Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# ॥ अथ मोहनचरितं प्रारभ्यते ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# ॥ विज्ञापना ॥

विदितमेतद्विदुषां यदेतस्मिन्भारते वर्षे चिरंतनानि धर्मप्रतिपादकानि दर्शनानि कालदोषादनुदिनं निदाघसमये सरांसीव तानवं भजन्ते । विरलतराश्चास्मिन्समये स्वयं समयानुसरणेन भविकसंघं सन्मार्गं प्रापयन्तः सन्तोऽपि प्रत्यूषे तारकापुञ्जा इव । तद्यदि कोऽपि मरुष्वमरतरुरिवान्धतमसे प्रदीप इव भवदवदग्धान्मिथ्याभिनिवेशान्धांश्च जनानुपदेशामृतं पाययित्वा सम्यक्त्वप्रदीपं च दत्त्वानुगृह्णीयात्तत्स लोकोत्तरगुणभाजनं पुरुषपुङ्गवः सर्वेषां गुणग्राहकाणां प्रशंसनीयोऽभ्यर्चनीयश्च नात्र संशीतिः । सांप्रतं खरतरगच्छनभोनभोमणिकल्पाः श्रीमन्मोहनमुनयः सर्वज्ञवचनानुगुणयुक्तियुक्तप्रबोधदानेन दुर्जनानां दौर्जन्यमपहरन्त एतामवसर्पिणीमुत्सर्पिणीदेश्यां विदधते । चरितं तेषामा जन्मतः श्रवणीयमभिनन्दनीयमनुकरणीयं चेत्यवधार्य जैनग्रन्थोत्तेजिकया पर्षदा प्रोत्साहितः स्वयमनुभूतं श्रुतं चानुरुद्ध्येदं यथामति प्राणयम् । इदं चामूलान्निरीक्ष्य संस्करणे साहाय्यं ददतां गाडगिळोपाह्वकेशवात्मजदिनकरशास्त्रिणां महान्तमुपकारभारं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वहामि। अत्र च भ्रान्तेः पुरुषधर्मत्वाद्यत्स्तोकं वा बहु वा स्खलितं परिदृश्येत तत्सुधीभिः क्षन्तव्यं संस्करणीयं चेत्यलं पल्लवितेन। ॥ ॥ ॥ ॥ ॥ ॥ ॥

अत्रच प्रथमद्वितीयसर्गयोर्यत्र यत्र 'संवदि' इति पदमागच्छति तत्र तत्र 'संवद्वर्षे' इत्यादिकोशप्रामाण्येन संवदीत्येतस्य प्रयुक्तस्याशुद्धिप्रतिपादनं न कार्यम्, बहुषु जैनीयग्रन्थेषु तथा प्रयुक्तत्वात्। अपिच, कोशकारस्यापि संवदित्यव्ययमेवेति नाग्रहः। ध्वनितं चेदं तदुपरितनटीकाकारेण 'प्रभवाख्या संवत्' इत्युदाहरणं ददता महेश्वरेण। अन्यथा 'क्रियाव्ययविशेषणे' इति लिङ्गानुशासनानुरोधेन 'प्रभवाख्यमित्येवोद्येत। नच तेनोदाहरणेन पाक्षिकी तस्य स्त्रीलिङ्गता ध्वन्यत इति अमुकमिते संवदीत्यनुपपन्नमिति वाच्यम्। दृढं भक्तिरस्य 'दृढभक्तिः' इत्यादाविव लिङ्गविशेषाभिधानाविवक्षया सामान्ये नपुंसकस्य सूपपादत्वात् भवत्येवोदीरितः प्रयोग इति।

मोहमय्याम्
ज्ञानपञ्चम्यां मङ्गले
संवत् १९५२.

दामोदरशर्मा.

For Private and Personal Use Only

gyanmandir@kobatirth.org

॥ श्रीः ॥ नमः सिद्धेभ्यः ॥ शंसन्तं त्रिदिवपतिं न यः शशंस निघ्नन्तं वृषभ[1]पुषं न यो निनिन्द ॥ यस्यासीज्जनुषि मही प्रहर्षिणीयं[2] सोऽव्याद्वस्त्रिजगदिनो भवादभव्यात्[3] ॥ १ ॥ बभूवु[4]रमिता इह त्रिजगदीश्वरा[5] भाविनः स्वरूपत इमे समास्तदपि यस्तपोवृद्धितः ॥ जगत्यलभतान्यदुर्लभयशःप्रथां पावनीं स पार्श्व इह संमतां दिशतु वः श्रुते संविदम्[6] ॥ २ ॥ यदीय[7]गुणगौरवात्[8]कमलमप्यगाद्गौरवं[9] यदीयवचनामृताद्गुरुरवामुचद्गौरवम्[10] ॥ बुधैर्नृपसदोगतैः कृतमहार्हणागौरवं भजामि तदनारतं भयहरं पदं गौरवम्[11] ॥ ३ ॥ अथ श्रीमन्महाराज–मोहना-

---

१ गोपम् । २ अस्य श्लोकस्य प्रहर्षिणी छन्दः सूचितमनेन । ३ अमङ्गलात् । ४ अस्य पृथ्वी छन्दः ५ तीर्थकराः । ६ सम्यग्ज्ञानम् । ७ अस्यापि पृथ्वी छन्दः । ८ श्रेष्ठत्वात् । ९ जडताम् । १० आत्मनि । आदरम् ११ गुरुसंबन्धि ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्यमुनीशितुः ॥ चरित्रं चारित्रयुत-मिदं प्रस्तूयतेऽद्भुतम् ॥ ४ ॥ म-
हान्ति सन्ति महतां प्रणीतानि महात्मभिः ॥ चरित्राणि लवित्राणि[1]
घनकर्मलताततेः ॥ ५ ॥ किमिदानींतनस्यैक-मुनिराजस्य वृत्ततः ॥
प्रयोजनमिति प्राज्ञं-मन्याः केऽपि शशङ्किरे ॥ ६ ॥ तान्प्रत्याचक्ष्महे
भव्याः सत्यं वो वचनं परम् ॥ एकान्तवाददुष्टत्वा-न्न स्याद्वादिकसंम-
तम् ॥ ७ ॥ अपि भूमण्डलेऽखण्डे मार्तण्डे चण्डतां गते ॥ किं गर्भा-
गारतमसो नुदे दीपो न युज्यते ॥ ८ ॥ तडागेऽम्बुधिकल्पेऽपि नृभि-
र्मन्दाग्निभिर्न किम् ॥ नातिमिष्टं च लघु च कौपं पेपीयते[2] पयः ॥ ९ ॥
तपे[3] तपनतापार्ता आढ्या जानपदा अपि॥ किं न सौधं समुत्सृज्या-

१ छेदकानि । २ वारंवारं पीयते । ३ ग्रीष्मे ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रामोटजनिवासिनः ॥ १० ॥ शतघ्नी शतहन्त्री या तथान्याप्यायु-
धावलिः ॥ सास्तां दूरे यन्निहन्ति शत्रूनैकान्तिकमागतम् ॥ ११ ॥
एवमन्तरमासाद्य यः कश्चित्प्रभवत्यपि ॥ सत्स्वन्येषु प्रबन्धेषु तथा-
यमवधार्यताम् ॥ १२ ॥ किं चाल्पगुणपात्रेषु गुणवत्त्वं प्रकल्प्य ये ॥
भजन्ति सत्फलं तेऽपि लभन्त इति निश्चितम् ॥ १३ ॥ पुनः श्रीमु-
निराजेऽस्मिन् भक्त्या च श्रद्धयापि च ॥ ये बिभ्रत्युत्कटं रागं ते स-
त्फलभुजो न किम् ॥ १४ ॥ तेषां भक्तिविवर्धनाय भवसंतानाल्पभा-
वाय च कालेनाध्यवसायशुद्धिवशतो निर्वाणसंपत्तये॥ श्राद्धैः श्रद्दधतां
वरैः सुमतिभिः संप्रेर्यमाणो मुदा प्रस्तावागतमाद्रियेऽत्रविबुधाः क्षा-

१ अस्य शार्दूलविक्रीडितं छन्दः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





म्यन्तु वैयात्यकम् ॥ १५ ॥ क्व चरित्रप्रणयनं क्व चेयं प्राकृता मतिः॥
भवितास्मि सतां नून–मुपहासस्य भाजनम् ॥ १६ ॥ महिमा श्री-
गुरोर्यद्वा मनसोऽपि न गोचरः॥ तदालम्बादिदं कर्तुं प्रवर्तेऽहं सुदुष्क-
रम् ॥ १७ ॥ (॥ इति प्रस्तावः ॥) भारतेऽस्मिन् दक्षिणार्धे मध्य-
खण्डेऽब्धिमण्डिते ॥ सौवीराख्योऽस्ति विषयः सुवीरजनतास्पदम्
॥ १८ ॥ यत्राभूवन् भूरिभव्याः शीलभूषणभूषिताः ॥ रमाया यद्व-
तिस्थानं हंसालेर्मानसं यथा ॥ १९ ॥ यस्मिन् राजन्वति जनाः प्रायः
पुण्यपरायणाः ॥ शातमेवावेदयन्ता–बध्नंश्चापि तदेव हि ॥ २० ॥
बन्धनं कुसुमेष्वेव भेदनं हाटकादिषु ॥ कुट्टनं स्वर्णरूप्यादौ यत्र ना-
न्यत्र दृश्यते ॥ २१ ॥ कौटिल्यमलकेष्वेव कलङ्कश्च कलानिधौ ॥ का-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लुष्यं वार्षिकजले यत्र नान्यत्र दृश्यते ॥ ७२ ॥ दण्डो ध्वजे तथा
छत्रे कम्पश्च करिकर्णयोः ॥ चिन्ता गहनशास्त्रेषु यत्र नान्यत्र दृश्यते
॥ ७३ ॥ करग्रहः परिणये रतावेव कचग्रहः ॥ चित्रकर्मसु वर्णानां सं-
करोऽन्यत्र नेक्ष्यते ॥ ७४ ॥ शून्यं गृहं शारिफले मदो मत्तमतङ्गजे ॥
जालमार्गो गवाक्षेषु यत्र नान्यत्र दृश्यते ॥ ७५ ॥ गलबन्धः कूपघटे
मर्दनं कुचकुम्भयोः ॥ निगडश्च गजेन्द्रेषु यत्र नान्यत्र दृश्यते ॥ ७६ ॥
गोष्ठा ग्रामोपमा यस्मिन् ग्रामाश्च नगरोपमाः ॥ नगराणि पुनर्विद्या-
धरश्रेणीसमान्यहो ॥ ७७ ॥ गोकुलानि यदीयानि तिष्ठन्ति विहरन्ति
च ॥ को वा क्षमेत संख्यातु-मपि संख्यानपण्डितः ॥ ७८ ॥ घटोध्न्यो
गृष्टयो यस्मिन् कामदोह्या दिवानिशम् ॥ यासां पयः पिबन् मर्त्यः

For Private and Personal Use Only

 



सुरधेनुं तृणायते ॥ २९ ॥ तत्रास्ति मथुरा नाम मथितारिनृपाविता ॥
राजन्वती राजधानी राजवृन्दनिषेविता ॥ ३० ॥ तीर्थे श्रीशीतले-
शस्य हरिनामा नृपोऽभवत् ॥ बहवस्तद्वंशभवाः पालयन्ति स्म यां
चिरम् ॥३१॥ ततस्तदीये वंशोऽभू–न्मुक्ताहारोपमो नृपः ॥ नाम्ना य-
दुरिति ख्यातो यशोधवलिताम्बरः ॥ ३२ ॥ यदोराविरभूद्यस्यां य-
दुवंशोऽतिविस्तृतः ॥ श्रीमता नेमिविभुना पावितो निजजन्मना ॥
॥ ३३ ॥यस्यां श्रीजिनभद्राख्यैर्गणिभिर्वाचनाकृत॥ तदादि प्रथिता
लोके माथुरी वाचना किल ॥ ३४ ॥ मदवाची मकारः स्याद्थाकारो
रागवाचकः ॥ यन्निवासी थूत्करोति द्वाविमौ मथुरा ततः ॥ ३५ ॥
तस्याः प्रतीच्युत्तरस्यां गव्यूतिदशकान्तरे ॥ पुरं चन्द्रपुरं नाम वि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्यते मुनिमण्डितम् ॥ ३६ ॥ सुखेन यत्र वसति जन ईतिविवर्जितः ॥
सद्धर्मो यत्र रमते विरागो विरते यथा ॥ ३७ ॥ ब्राह्मणा ब्रह्मनिरताः
क्षत्रियास्त्राणतत्पराः ॥ वैश्याश्च यत्र वाणिज्य–पराः शूद्राश्च सेवकाः
॥ ३८ ॥ स्वस्वकर्मरता एवं धर्ममाराध्य भक्तितः ॥ साधयन्ति चतुर्वर्गं
त्रिवर्गं वा यथाबलम् ॥ ३९ ॥ यत्रानिशं यशःकान्ति–द्योतिताम्बर-
मण्डलाः ॥ चतुःषष्टिकलावन्तः समाः पक्षद्वयेऽपि च ॥ ४० ॥ चन्द्रा-
तिशायिमाहात्म्याः सन्ति लोकाः सहस्रशः ॥ तेनेदं प्रथितं लोके
नाम्ना चन्द्रपुरं किल ॥ ४१ ॥ चकारो वक्ति दुष्कर्म तं द्रावयति य-
ज्जनः॥ तेन चन्द्रपुरं नामा–लङ्क्तैतन्मतं मम ॥ ४२ ॥ सनाढ्या नाम
तत्रैका जातिरस्ति द्विजन्मनाम् ॥ विद्याविनयसंपन्ना यस्यामुदभवन्

For Private and Personal Use Only

द्विजाः ॥ ४३ ॥ योऽस्यां संजायते जातौ स ना आढ्य इति स्फुटम् ॥
स्वकीयं नाम निर्वक्ति सनाढ्या तत उच्यते ॥ ४४ ॥ तस्यामेको द्विज-
न्मान्नाम्ना बदरमल्लकः ॥ तस्य शीलवती नाम्ना सुन्दरी सद्धर्मिणी ॥ ४५ ॥ बलवाची बकारः स्याद्दकारेण दयोच्यते ॥ बलं कर्म-
रिपूच्छेदि दया षट्कायजीवनी ॥ ४६ ॥ एताभ्यां राजते यः स बदरः
परिकीर्त्यते ॥ विनायुधं यो जयति रिपून्मल्लः स उच्यते ॥ ४७ ॥
दधान ईदृशं योग-रूढं नाम स वाडवः ॥ गमयन्नस्ति कालं स्व-
मार्तरौद्रविवर्जितः ॥ ४८ ॥ पतिशुश्रूषणरता विरतावद्यकर्मणः ॥
शान्ता चोदारचित्ता च करुणाकोमला नृशम् ॥ ४९ ॥ दोषप्रकटने
मूका गुणोज्ञाने च वाग्मिनी ॥ दोषेक्षणे तथान्धा च गुणालोके सु-



For Private and Personal Use Only

लोचना ॥ ५० ॥ रहस्यश्रवणेऽन्येषा–मतीव बधिरा तथा ॥ गुणानु-
वादश्रवणे पटुश्रवणशालिनी ॥ ५१ ॥ एवं सद्गुणरत्नानां मन्दिरं सा
तु सुन्दरी ॥ कालं गमयति श्रेयः–काम्यया़धिविनाकृता ॥ ५२ ॥
एकदा सा निशाशेषे सुखसुप्ता निरामया ॥ मुखे विशन्तमद्राक्षीत्
पूर्णमिन्दुं शुभानना ॥५३॥ सद्यः प्रबुध्य ननाम देवदेवं ततो मुदा ॥
शुचिर्भूत्वा प्रबुध्याय भर्त्रे स्वप्नमचीकथत् ॥ ५४ ॥ श्रुत्वा स्वप्नं स
मोदावि–र्भवदस्त्राङ्गरह्लकः ॥ प्राह प्रियामश्रुबिन्दून् हृदि हारनि-
भान्दधत् ॥ ५५ ॥ दिष्ट्या सुन्दरि सूनुस्ते भविता भुवनातिगः ॥
धन्यासि कृतपुण्यासि भवेशाराधनादृता ॥ ५६ ॥ स्वीकृत्य शिरसा
पत्यु–र्वचनं सुन्दरी तदा ॥ देवं गुरुं पतिं चापि विशेषात्पर्युपास्त सा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥५७॥ संहस्रं च शतान्यष्टौ षडशीतिस्तथैव च ॥ एतावदब्दप्रमिते
विक्रमादित्यसंवदि ॥ ५८ ॥ आषाढ्यामुत्तराषाढा–गते सोमे निशी-
 थके ॥ स्वश्र्युतः श्रीमोहनात्मा सुन्दरीगर्भमाविशत् ॥ ५९ ॥ तदादि
मोदपूर्णा सा प्रसन्नास्या च सुन्दरी ॥ सत्ववन्तमथात्मानं निश्चिकाय
स्वया धिया ॥ ६० ॥ द्वितीये मासि सुन्दर्याः शरीरे मानसे तथा ॥
गर्भिणीलक्षणान्येवं प्राडुरासन् शुभान्यथ ॥ ६१ ॥ स्वयं कार्श्यमु-
रीकृत्या–पुषद्गर्भं तु सादरात् ॥ परोपकारव्यसनी नहि स्वार्थमपेक्षते
॥ ६२ ॥ अस्मिन् भवेऽयं सूनुर्मे कर्माणि तनुतां नयेत् ॥ इतीवावे-
दयन्ती सा तनोस्तानवमातनोत् ॥ ६३ ॥ कषायानिन्द्रियार्थांश्च प- 
रिग्रहमथाखिलम् ॥ वमेदयमितीवासौ वमिव्याजादसूसुचत् ॥ ६४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुखं पौद्गलिकं त्वस्मै नैवेषदपि रोचिता ॥ इतीव शंसितुं साभू–दरो-
चकनिपीडिता ॥ ६५ ॥ आचामाम्लादितपसा क्षपयिष्यत्यसौ रजः॥
इतीवाम्लरसास्वादे सुन्दरी लालसां दधौ ॥६६॥ गर्भस्थेनैव मुनिना
मूर्छा या निरवास्यत ॥ सा निर्यान्ती कियत्काल–मवसत्सुन्दरीतनौ
॥ ६७ ॥ गर्भस्थेनैव यत्कर्म क्षपितं मुनिनाशुभम् ॥ तद्रोमराजिमि-
षत उदियायोदरे किल ॥ ६८ ॥ पूतः पाता कदायं मे पय इत्येवमा-
र्तितः ॥ अपि पुष्टं स्तनयुगं किलाभूत्कृष्णचूचुकम् ॥६९॥ गर्भस्थस्य
मुनेः सेवां कर्तुं गङ्गागमत्किल ॥ सा प्रसेकमिषान्मन्ये सुन्दरीमुख-
तोऽवहत् ॥ ७० ॥ चतुर्विधस्य संघस्य रक्षामेष विधास्यति ॥ इतीव
सुन्दरीरक्षा–स्वादने दोहदं दधौ ॥ ७१ ॥ धर्मोपदेशं विमलं भवि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भ्योऽयंप्रदास्यति॥ अतोऽनुकम्पादिदाने सुन्दरी सस्पृहाभवत्॥१२॥
गर्भस्थेनैव मुनिना प्रेरिता खलु सुन्दरी ॥ चतुर्थाद्येकभुक्तादि तपस्त-
प्तुमियेष च ॥१३॥ ऐच्छत्सा देशनां दातु-मियेष व्रतपञ्चकम् ॥ चक्रमे
विविधां तीर्थ-यात्रां संघेन संयुता ॥ १४ ॥ एवमादीनि चिह्नानि शु-
भोदर्काणि भूरिशः ॥ शाताशातोत्पादकानि सेहे साम्येन सा सती
॥ १५ ॥ मासेषु निधिमानेषु दिवसेषु च पञ्चसु ॥ अतिक्रान्तेषु सु-
न्दर्याः सूतिकाल उपागमत् ॥ १६ ॥ मुनीभेंगंजभूमिते नृपतिविक्र-
मावत्सरे रवावुदगिते मधौ मधुसुमे सिते माधवे॥ तिथौ च गुरुदैवते
शशिनि वैश्वदेवं गते तथा द्युमणिमण्डलेऽम्बरत लेललाटंतपे॥१७॥

१ अस्य पृथ्वी छन्दः।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(जन्माङ्कम्)




रवावजगते विधौ मकरगे कुजे मेषगे बुधे झष-गते गुरावपि च कन्यकायां गते ॥ नृगौ घट-गते शनौ मिथुनगे च सिंहाभिधे सुलग्न इह सुन्दरी सुतमसूत लोकोत्तरम् ॥ ७८ ॥ युग्मम्॥

[1]तदा प्रसन्ना हरितो बभूवुः सुखास्तथा गन्धवहा ववुश्च ॥ प्रदक्षिणा-र्चिर्हुतभुग्दिदीपे सुनिर्मलं चाम्बु यथा घनान्ते ॥७९॥ [2]फुल्ला तथोद्या-नततिर्बभासे हृष्टाखिलाभूज्जनता नितान्तम्॥ मन्येऽमुना स्वःसमुपा-गतेन स्तोकं ददे दिव्यसुखं जनाय ॥ ८० ॥ [3]कर्माष्टकोच्छेदकरं महद्बलं संप्राप्नुतात्कालवशादयं मुनिः ॥ मत्वेति धात्रीतमसेचयद्भला–तैलेन

१ उपेन्द्रवज्रा वृत्तम् । २ इन्द्रवज्रा छन्दः । ३ इन्द्रवंशा छन्दः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सूतिव्यथितं सुतं मुदा ॥८१॥ [1]कर्ता कुलोद्द्योतमयं किलात्मभू–रित्ये-
वमाज्ञाय धियानवद्यया ॥ सावादयत्कर्णयुगेऽस्य गोलकौ यद्दुस्त्यजा
लौकिकधर्मपद्धतिः ॥ ८२ ॥ [2]ततः समाकर्ण्य सुतोद्भवं गृहे प्रहृष्टचेता
बदरः समाययौ ॥ सुखप्रसूतामथ सुन्दरीं विदन् स जातकर्माकुरु-
तात्मजन्मनः ॥ ८३ ॥ [3]कर्माणि चत्वार्यवशेष्य घातका–न्यन्यानि
भेत्ता कतिभिर्भवैरयम् ॥ मत्वेति नालं चतुरङ्गुलं तु सा मुक्त्वावशेषं
सकलं समच्छिनत् ॥ ८४ ॥ कान्त्या सुवर्णाभतनुर्भवेदयं क्रान्त्याभयं
सत्वचयाय यच्छतात् ॥ संप्रीणयेद्भव्यजनान्वचोऽमृतै–र्ब्राह्मीं स्थितिं
साधयताच्छनैःशनैः ॥ ८५ ॥ कर्माण्ययं तापयतात्तपश्चयै–रेवं समा-

---

१ अस्यापीन्द्रवंशैव । २ वंशस्थविलं वृत्तम् । ३ अतः परं श्लोकचतुष्टयस्य इन्द्रवंशा छन्दः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धाय मनस्यपाययत् ॥ धात्री सुवर्णं त्वभयां वचामपि ब्राह्मीं तथा ताप्यकमर्भकं द्रुतम् ॥ ८६ ॥ युग्मम् ॥ गर्भोदकं वामयितुं ततश्च सा सर्पिस्तथा सैन्धवमप्यपाययत् ॥ स्वस्थं परिज्ञाय जहर्षुरर्भकं धात्री सुपात्री बदरश्च सुन्दरी ॥ ८७ ॥ [१]दिनेषु रुद्रप्रमितेषु जन्मनो गतेषु माङ्गल्यविधिं विधाय सः ॥ व्यधत्त सूनोरभिधानमादरा–ज्जनेषु यन्मोहन इत्युदीर्यते ॥ ८८ ॥ [२]यथा कलावान् कलयैधते सिते यथा क्षुपः प्रावृषि पत्रलेखया ॥ तथैष बाल्ये कलयाभ्यवर्धत सन्तः शनैः सत्पदमाक्रमन्ति यत् ॥ ८९ ॥ [३]आस्येन सोमं त्वधरेण बिम्बं पद्भ्यां कराभ्याममलं सरोजम् ॥ कण्ठेन कम्बुं च जिगाय बालः कर्माणि

१ वंशस्थविलं वृत्तम्। २ वंशस्थलेन्द्रवंशयोरुपजातिः। ३ इन्द्रवंशा छन्दः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जेतुं तुलना किलेयम् ॥ ८० ॥ [1] स दन्तहीनस्मितचारुकान्तिना मुखेन बिम्बोष्ठपुटेन हारिणा ॥ अधश्चकाराभिनवाम्बुजन्मनः श्रियं नखालूनमृणालसंततेः ॥ ८१ ॥ [2] मासेषु पञ्चस्वथ निर्गतेषु पञ्चाङ्गशुद्धे दिवसेऽतिहृष्टः ॥ सज्ञातिवर्गो बदरो व्यधत्त क्षीरौदनप्राशनकर्म सूनोः ॥ ८२ ॥ [3] वैमानिकेष्वेषु भवाः कियन्तो भोग्या मयेतीक्षितुमेव मन्ये ॥ षण्मासमेकाग्रदृशैव सोऽय-मुत्तानशाय्यूर्ध्वमपश्यदभ्रम् ॥ ८३ ॥ [4] नीचैः कियद्वारमहं पुरागा-मिति प्रसंख्यातुमिवैष बालः ॥ अधोमुखीभूय ततो ददर्श संवेगकृत्पूर्वभवज्ञता हि ॥ ८४ ॥ ततोऽष्टमे मास्युदपद्यतास्य दन्तद्वयं कुन्दनिभं सुतीक्ष्णम् ॥ स्याद्वत्सरेऽयं द्विगु-[१६]

१ वंशस्थविलं वृत्तम् । २ इन्द्रवज्रा वृत्तम् । ३ इन्द्रवज्रा छन्दः । ४ अतः परं श्लोकचतुष्टयस्य उपजातिश्छन्दः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णाष्टमाने दान्तोऽयमित्येवमसूसुचद्यत् ॥ ९५ ॥ भवे चतुर्गत्युपल-
क्षितेऽह-मनन्तवारं निजकर्मणागाम् ॥ जानुद्वयेनापि करद्वयेन रिङ्ग-
न्मुदेत्येवमचीकथत्सः ॥ ९६ ॥ गतिद्वयं देवनराभिधानं शिष्टं ममेति
प्रकटीचिकीर्षुः ॥ करं जनन्या अवलम्ब्य गन्तु-मैच्छत्पदाभ्यामसकृ-
त्स्खलन्सः ॥ ९७ ॥ मा[1] मा जनाः पतत संसृतिदुस्तराब्धौ संयच्छते-
न्द्रियगणं श्रयतात्म[2]धर्मम् ॥ इत्येवमाप्तवचनादुपदेष्टुकामो मामेति
वाक्यमवदत्प्रथमं किलासौ ॥ ९८ ॥ विज्ञाय वाग्मिनमथो सुतमा-
त्मनीनं सद्वासरे स वदरो मुदितो नितान्तम् ॥ विद्याः कलाश्च परि-
शीलयितुं बुधानु-मत्या तु लौकिकगुरोः कर आर्पयत्तम् ॥ ९९ ॥

---

१ अतःपरं श्लोकत्रयस्य वसन्ततिलकं छन्दः । २ ज्ञानदर्शनचारित्रादिरूपम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यद्यद्यथा गुरुरुवाच यथानुपूर्वि तत्तत्तया सपदि सोऽपि विदाचकार॥
छाया न मृन्मयतले लभते प्रतिष्ठां शुद्धे तु दर्पणतले सुलभावकाशा
॥ १०० ॥ इति विशदविशालप्रज्ञया मान्ययायं सपदि विदधदन्त-
र्मोदमध्यापकं स्वम् ॥ जननदिवसतो निर्यापयामास सप्त विगलित-
मदमानो वत्सरान्संमदेन ॥ १०१ ॥ ॥ ॥ ॥
॥ श्रीः ॥ नमः सिद्धेभ्यः॥ शंकरः कर्मसंहाराद् विष्णुः सद्धर्मरक्षणात् ॥
ब्रह्मा धर्मोत्पादकत्वाद् यः स वो दिशतु श्रियम् ॥ १ ॥ इतश्च भारते
देशो मरुनामा मनोहरः ॥ गुणाधिकं यदुदकं वीक्ष्यागाद्धनतां घृतम्
॥ २ ॥ सुकृतैकनिधौ यस्मिन् प्रायो जानपदा जनाः ॥ पूर्णायुषोऽति-

१ मालिनी वृत्तम् ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बलिन–स्तथाधिव्याधिवर्जिताः ॥ ३ ॥ यन्मात्रावद्धेम मेरौ ततः स मात्रयाङ्कितः॥ अमात्रमस्मिंस्तेनायं मरुरित्यभिधीयते ॥ ४॥ सौन्दर्यं यत्र सोदर्यं शीलं शशिकलोज्ज्वलम् ॥ वामानामप्यवामानां स्वान्तं सम्यक्त्वसंस्कृतम् ॥ ५ ॥ सद्गुणैकनिधौ यस्मिन् श्राद्धाः श्रद्धालवो भृशम् ॥ साधवोऽप्यनतीचार–चारित्राचरणोद्यताः ॥ ६ ॥ अर्हद्भि-राचार्यवर्यै–रुपाध्यायैश्च साधुभिः ॥ वासेन च विहारेण पुपूये यः पदे पदे ॥ ७ ॥ श्रवणेन जिनाज्ञायाः श्राद्धा विनयसंभृताः॥ सद्धर्मे निरतास्तेन ख्याता यत्र जडा–(ला–)द्धपता ॥ ८ ॥ पतन्तः पाशकाः पात–वशाद्योषवशंवदाः ॥ पातयन्ति ध्रुवं पात–यितारं नरकावनौ ॥ ९ ॥ अधर्म्यमयशस्यं च लोकद्वयसुखापहम् ॥ द्यूतं द्युतिहरं मूलं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





व्यसनानां प्रकीर्तितम् ॥ १० ॥ य इच्छेन्निरये गन्तुं मां स चुङ्क्षामि-
द्वाल्पधीः ॥ इति निर्वचनं यस्य तन्मांसमतिगर्हितम् ॥ ११ ॥
जायायां च जनन्यां च पानाद्यस्य मतिः समा ॥ मद्यं तद्बहुसावद्यं
यशोधर्मार्थनाशनम् ॥ १२ ॥ बलनाशकरं व्याधि-जरयोर्मूलमादिम-
म् ॥ परस्त्रीसेवनं गर्ह्यं कोऽभिनन्देद्विचक्षणः ॥ १३ ॥ सद्धर्मसाधनं
देहं या तुच्छधनलिप्सया ॥ विक्रीणातीह सा वेश्या विश्वस्तजनघा-
तिनी ॥१४॥ यत्र क्षणिकलीलार्थं ह्रियते जन्म जन्मिनाम् ॥ मृगया
सेह मृतिदा परत्र निरयप्रदा ॥ १५ ॥ वित्तं नामेह जन्तूनां प्राणाः
प्रोक्ता बहिश्चराः ॥ तद्धरन् हरति प्राणां-स्तस्माच्चौर्यं विगर्हितम्
॥ १६ ॥ प्रतिषिद्धं जिनवरै-रिदं व्यसनसप्तकम् ॥ ज्ञात्वा परिज्ञया



For Private and Personal Use Only

प्रत्या–ख्यायते यत्र धर्मिभिः ॥१७॥ भारते निखिलेऽप्यस्मि–न्नाक्रान्ते यवनादिभिः ॥ देशो य आसीदार्याणां राज्ञां हस्ते यथा पुरा ॥१८॥ कालेन यस्मिन् बहवोऽ–भूवन् माण्डलिका नृपाः ॥ तेषां कतिप-येऽद्यापि विद्यन्ते जनविश्रुताः ॥१९॥ ख्यातं नाम्ना जयपुरं जयश्री-केलिमन्दिरम् ॥ तथा योधपुरं नाम योधवृन्दविभूषितम् ॥ २० ॥ राजधानीद्वयमिदं पुरग्रामादिसंकुलम् ॥ भारतश्रीविशालोरः–कल्पे तस्मिन् विराजते ॥ २१ ॥ द्वयोर्विरत्योः सर्वस्मा–द्विरतिर्यद्वदुत्तमा ॥ तथैतस्मिन्द्वये योध–पुरं सर्वपुरोत्तमम् ॥ २२ ॥ तत्र भद्रासने राज–पुत्राख्यान्वयजा नृपाः ॥ चिरादशासुस्तं देशं रघवः कोशलं यथा ॥ २३ ॥ विक्रमार्काब्दतस्योन–विंशस्यान्त्ये तुरीयके ॥ भागे तस्मिन्पुरे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राजा मानसिंहाभिधोऽभवत् ॥ २४ ॥ मानसिंहे यथान्यायं राज्यं शासति धीमति ॥ प्रजाः प्रजावत्य आसन् धनाढ्या धर्मतत्पराः ॥ २५ ॥ भद्रकत्वात्तस्य राज्ञो जैनसंघश्चतुर्विधः ॥ यथार्हमाचरद्धर्मं तद्राष्ट्रे बाधया विना ॥ २६ ॥ तस्माद्योधपुरात्पञ्च-त्रिंशत्क्रोशमितेऽ-न्तरे ॥ पुरं नागपुरं नाम विद्यतेऽतिसमृद्धिमत् ॥२७॥ श्रेष्ठार्थगोचरो नाग-शब्दः शास्त्रे प्रकीर्तितः ॥ श्रेष्ठानां वसतेरेत-द्धेतोर्नागपुरा-भिधाम् ॥ २८ ॥ आलस्येनानुद्यमी यः सोऽग इत्यभिधीयते ॥ नै-वास्त्यगोऽस्मिन्नित्येत-त्पुरं नागाभिधं किल ॥ २९ ॥ आचार्योपा-ध्यायसाधु-वर्याणामत्र विद्यते ॥ भूयसी स्पर्शना तस्मा-दिदं पाव-नमुच्यते ॥ ३० ॥ सन्ति यद्यपि राष्ट्रेऽस्य पुराण्यन्यानि भूरिशः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथापि तेभ्यः सर्वेभ्य इदं राज्ञोऽतिवल्लभम् ॥ ३१ ॥ यद्यप्यस्माद्यो-
धपुरं सुमहद्दृद्धिशालि च ॥ तथापि राज्ञोऽत्र रुचि-र्नैतच्चित्रं यदु-
च्यते ॥३२॥ जनाः सुकृतिनो यस्मि-न्वसन्ति विमलाशयाः॥ तत्पुरं
नगरं वापि सतां स्वान्तं हरेत्सदा ॥३३॥ प्रायशो निवसन्त्यत्र जनाः
सुलभबोधयः ॥ मुनयः समवासार्षु-रस्मिन् प्राभाविकास्तथा॥३४॥
बहवोऽत्र समाजग्मु-र्मुनयः पञ्चमीं गतिम्॥ श्राद्धास्तथाराध्य धर्म-
मवापुः स्वर्गतिं पराम्॥ ३५ ॥ स्पर्शनार्हमतः क्षेत्र-मिदं मत्वा मुनी-
श्वराः ॥ यथासुखं वसन्ति स्म श्राद्धैः संमानिता भृशम् ॥ ३६ ॥
समवात्सुस्तत्र रूप-चन्द्राख्या विमलाशयाः॥ यतयो निरतीचार-
तुरीयव्रतधारिणः ॥ ३७ ॥ तदा खरतरे गच्छेऽभवन् प्राभाविकास्तु

For Private and Personal Use Only

ये ॥ रेखावन्त इमेऽभूवं–स्तेषु विद्याप्रभावतः ॥ ३८ ॥ श्रुतं शमाय
मन्त्रादि–विज्ञानं विघ्नशान्तये॥ वचो यदीयं बोधाय धन्यास्ते यतयो
भुवि ॥ ३९ ॥ शासनाधीशभगव–न्महावीराद्यथागमत् ॥ संतान
एषां तत्प्रास–ङ्गिकं किंचिदिहोच्यते ॥ ४० ॥ महावीरात्सुधर्मार्य–
जम्बूश्रीप्रभवादयः ॥ आचार्याः क्रमशोऽभूवन् नवत्रिंशत्सुसंयताः
॥ ४१ ॥ चत्वारिंशास्ततोऽभूव–न्सूरयः श्रीजिनेश्वराः ॥ अणहिल्लं
पत्तनं ते विहरन्तः समागमन् ॥ ४२ ॥ धर्मोद्द्योतं कृतं तत्र श्रीजिने-
श्वरसूरिभिः ॥ वीक्ष्य भीमनृपः सद्यः प्रससाद महामनाः ॥ ४३ ॥
प्रतिवादिमतोत्साद एते खरतरा इति ॥ तेभ्यः खरतरेत्याख्यं बिरुदं
प्रददौ नृपः॥ ४४ ॥ गगनेभव्योमचन्द्र–मिते विक्रमसंवदि ॥ अल-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भन्त नृपादेतद् बिरुदं श्रीजिनेश्वराः ॥ ४५ ॥ शासने वर्धमानस्य
कुलं चान्द्रं पुरातनम् ॥ तस्मादारभ्य लोकेऽस्मि–न्नाम्नोत्खरतराभि-
धाम् ॥ ४६ ॥ तत्पट्टे जिनचन्द्राख्या अभवन्सूरयस्ततः ॥ संवेगर-
ङ्गशालादि–ग्रन्थरत्नविधायकाः ॥ ४७ ॥ सूरयोऽभयदेवाख्या–स्तेषां
पट्टेऽतिविश्रुताः ॥ नवाङ्गीवृत्तिकर्त्तारो–ऽभूवंस्तीर्थप्रभावकाः ॥ ४८ ॥
ततस्तेषां पट्ट आसन् सूरयो जिनवल्लभाः ॥ संघपट्टादिकर्तारो भ-
व्यबोधविशारदाः॥ ४९ ॥तेषां पट्टे जज्ञिरेऽथ जिनदत्तादयोऽमलाः॥
सूरयः संयमैर्[१७]मिताः शासनोन्नतिकारकाः ॥ ५० ॥ प्रादुरासन्नेकषष्टि–
तमे पट्टेऽथ वत्सरे ॥ नेत्रेन्दुरसभूमाने[१६१२] जिनचन्द्राख्यसूरयः ॥ ५१ ॥
लुप्तप्रायमथाचारं साधूना संप्रधार्य ते॥ संविग्नैः साधुभिः सार्धं क्रि-

For Private and Personal Use Only

योऽधारं व्यधुः स्वयम् ॥ ५२ ॥ पत्तनेऽथाणहिल्लाख्ये कंचिङुत्सूत्रवा-
दिनम् ॥ ते तत्त्वयुक्त्या निर्जित्य विशदं यश आसदन् ॥ ५३ ॥
अथ लोहपुरे गत्वा–कबराख्यं महीपतिम् ॥ वाचोयुक्त्या विविधया
बोधयामासुरन्वहम् ॥ ५४ ॥ प्रतिबुद्धः स तेभ्योऽदा–द्युगंधरपदं व-
रम् ॥ अमारीपटहोद्घोषं पर्वसु प्रत्यपद्यत ॥५५॥ तेषु स्वर्गं प्रयातेषु
जज्ञिरे पट्टधारकाः ॥ जिनसिंहाभिधास्तेऽपि वितेनुः शासनोन्नतिम्
॥ ५६ ॥ पट्टे तेषामराजन्त जिनराजाख्यसूरयः ॥ जिनरत्नाभिधाना-
स्त–त्पट्टे सूरिवरा बभुः ॥५७॥ पञ्चषष्टितमे पट्टे सप्तमा जज्ञिरे ततः॥
सूरयो जिनचन्द्रास्ते स्वनामानुगुणं व्यधुः ॥ ५८ ॥ पट्टे [६६] रसर्तुप्रमिते
जिनादिसुखसूरयः ॥ रेजिरे शुभ्रयशसा धवलीकृतदिङ्मुखाः॥ ५९ ॥



For Private and Personal Use Only

गोत्रर्तुमितपट्टेऽथ जिनाद्या भक्तिसूरयः ॥ आसन्भव्यमनोऽम्भोज-प्रबोधे भानुसंनिभाः ॥ ६० ॥ जिनादिसुखसूरीणां कर्मचन्द्राभिधाः परे ॥ विनेया नयभङ्गीषु निपुणा अभवन्भुवि ॥ ६१ ॥ तेषामीश्वर-दासाख्याः शिष्या आसन्सतां मताः ॥ तद्विनेया वृद्धिचन्द्रा नयनी-तिविशारदाः॥ ६२ ॥ तच्छिष्या लालचन्द्राख्या अभवन्नतिविश्रुताः॥ जिनभाषिततत्त्वार्थ-ज्ञातारोऽमलबुद्धयः॥ ६३ ॥ तेषां विनेया अभ-वन् रूपचन्द्रा महाधियः॥ प्रायः ज्ञातोत्पादके ते पुरे नागपुरेऽवसन् ॥६४॥ नंभोमुनिमिते पट्टे जिनहर्षाख्यसूरयः ॥ अलंचक्रूरूपचन्द्रा-स्तत्पार्श्वे व्रतमादधुः ॥ ६५ ॥ एवं वीराद्रूपचन्द्र-संतान उपवर्णितः॥ अधुना प्रस्तुताख्याना-वसरस्तन्निगद्यते ॥६६॥ एकदा क्षणदायामे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





चरमे गदवर्जिताः॥ सुखसुप्ता रूपचन्द्राः स्वप्नमेवं व्यलोकयन् ॥६७॥
हैमं कुम्भं पायसेना–पूर्णं कश्चित्करे दधत् ॥ प्रसद्येदं स्वीक्रियता–
मेवं प्रार्थयते मुहुः ॥ ६८ ॥ ततः प्रबुद्धास्ते सद्यः स्वप्नार्थं तं यथा-
श्रुतम् ॥ व्यचारयन्देशकाल–द्रव्यक्षेत्रानुसारतः ॥ ६९ ॥ विनेयो
नयवान्नून–मस्माल्लब्धा मम द्रुतम् ॥ निश्चित्यैवं तेऽन्तरायो मा भू-
दित्यजपन्मनुम् ॥ ७० ॥ इतश्चन्द्रपुरेऽप्यार्या सुन्दरी बदरस्तथा ॥
चिन्तानाचान्तमनसौ स्वप्नमेवमपश्यताम्॥ ७१ ॥परिविष्टं पायसान्नं
पुरोवर्त्यपि कश्चन ॥ जहार स्वर्णपात्रस्थं वीक्ष्येदं तौ विषेदतुः॥७२॥
पृष्टो नैमित्तिकस्ताभ्या–मवोचत महाशयौ ॥ तनयो युवयोर्दीक्षां जै-
नीमादास्यति ध्रुवम् ॥ ७३ ॥ प्रियसूनोरावयोश्च वियोगो भविता

॥१४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किल ॥ इति मत्वा तावभूतां मनसि व्यथितौ भृशम् ॥ १४ ॥ यद-
भावि न तद्भावि भावि चेन्न तदन्यथा ॥ एवं विदन्तावपि तौ जेतुं
नाशकतां मनः ॥१५॥ अन्यदार्या सुन्दरी सा विवेकाद्विशदाशया ॥
जित्वा सुदुर्जयं स्नेहं भर्तारमिदमब्रवीत् ॥ १६ ॥ यदि स्वयमयं सूनु-
र्विहायास्मान्व्रजेत्तदा ॥ शोकाम्बुधौ मज्जतां नः शरणं को भवेद्भुवि
॥ १७ ॥ सुपात्रं यतिनं वीक्ष्य स्वयमेव वयं यदि ॥ तनयं वितरेमैनं
मनाग्दुःखं तदा भवेत् ॥ १८ ॥ एवं श्रवणयोस्तस्य पपात स्त्रीवच-
स्तदा ॥ विधीयतां कथं कार्य-मेवं चिन्ताकुलोऽभवत् ॥१९॥ चिन्त-
यित्वा चिरं सोऽथ विवेकामलमानसः ॥ अजानाद्दारवचनं तदात्वे
चायतौ हितम् ॥ ८० ॥ गृहीत्वेमं सुतं सम्यक् कः पालयितुमर्हति ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ध्यायन्नेवमथो नाग-पुरस्यास्मरदप्यसौ ॥ ८१ ॥ रूपचन्द्राः पुरे नाग-पुरे ये सन्ति सत्तमाः ॥ त एव पात्रमेतस्य निश्चिकायेति स द्रुतम् ॥ ८२ ॥ समये शोभनोदर्के बदरो मुदितोऽन्यदा ॥ शाकुनैः प्रेरितो रम्यैः प्राप नागपुरं पुरम् ॥ ८३ ॥ वसतौ रूपचन्द्राणां स गत्वाप परां मुदम् ॥ तेषां शमरसापूर्णं विज्ञाय हृदयाम्बुजम् ॥८४॥ पप्रच्छानामयं सोऽथ गुरुदेवप्रसादतः ॥ प्रत्यूचुरिति ते सोऽपि निज-वृत्तमचीकथत् ॥८५॥ स्वप्नः स्वप्नफलं विज्ञैः प्रोक्तं जायावचस्तथा ॥ स्वाभिप्रायश्चेति सर्वं बदरेण न्यवेद्यत ॥ ८६ ॥ निपीय पीयूषनिभं वचनं बदरोदितम् ॥ रूपचन्द्रा निजं स्वप्नं फलोन्मुखमवीविदन् ॥८७॥ ऽन्यक्षेत्रे कालभावौ यथामति विचिन्त्य ते ॥ वचोऽनुमेनिरे तस्य



For Private and Personal Use Only

विज्ञायायतिमुत्तमम् ॥ ८८ ॥ अङ्गीकृते[1] वचसि तैर्बदरान्तरात्मा हर्षं च शोकमनजद्युगपत्तदानीम् ॥ तेनायमन्वकुरुतेन्दुमनूनबिम्बं राका-मुखोदितमपि प्रतताङ्कुरेखम् ॥ ८९ ॥ स्वप्नो[2]ऽविसंवादिफलस्ततोऽयं मदात्मजः स्थास्यति नैव गेहे ॥ न रूपचन्द्रप्रतिमोऽस्ति लोके शा-रण्य इत्येष जहर्ष चित्ते ॥९०॥ आलोक्यते[3] स्म सुकृतैर्बहुनिर्यदीय-मस्मान्निरिन्दुविमलं वदनारविन्दम्॥ योऽस्मन्मनोरथतरोर्दृढमूलमस्य सोढा कथं विरह एवमसौ शुशोच ॥ ९१ ॥ इत्थं क्षणं प्रमदशोकव-शंवदः स श्रेयो द्वयोः कतरदित्यवगन्तुमीशः ॥ नाभूदवास्थित परं स्थिर एष कांत–युग्मेन कृष्ट इव मध्यगतोऽपि लोहः ॥ ९२ ॥ सं[4]

१ वसन्ततिलकं छन्दः। २ उपजातिश्छन्दः। ३ इतः श्लोकद्वयस्य वसन्ततिलकं छन्दः। ४ उपजातिश्छन्दः।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रूपचन्द्रानुमतिं गृहीत्वा गन्तुं प्रतस्थे पुरमुत्सुकः स्वम् ॥ गच्छन्नयं
वर्त्मनि नान्यचेताः विचिन्तयामास दशां भवित्रीम् ॥ ९३ ॥ [1]आगा-
त्क्रमेणैष निजं निशान्त-मेनं निरीक्ष्याहृषदस्य जाया ॥ रथाङ्गकान्ता
विरहानलार्ता प्रत्यूषसीव प्रियमभ्युपेतम् ॥ ९४ ॥ स[2] सुन्दरीं तां
श्रवणोत्कमानसां सर्वं यथावृत्तमुवाच दुर्मनाः ॥ सती परिज्ञाय तदी-
यमाशयं धैर्यं सृजन्त्येनमबोधयत्पुनः ॥ ९५ ॥ स[3] बोधितः स्वप्रियया
बभार स्वान्तं प्रसन्नं शारदीव नीरम् ॥ तस्मिन्प्रसन्ने तनयोद्भवेन मो-
हेन सद्यो मुमुचे स धन्यः ॥ ९६ ॥ श्रीमोहनो यद्यपि वत्सराद्य-ष्ट-
यक्त्ववर्ती वयसा तदानीम् ॥ तथापि नैच्छत्स गृहेऽधिवस्तुं सन्तः

१ उपजातिश्छन्दः । २ वंशस्थविलेन्द्रवंशयोरुपजातिरियम् । ३ इतस्त्रयस्योपजातिश्छन्दः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रकृत्या विमुखा गृहेभ्यः ॥ ९७ ॥ अथो मुहूर्ते बदरो विशुद्धे स्नातः समभ्यर्चितदेवदेवः ॥ प्रोत्साहितः स्वप्रियया स नाग-पुरं प्रतस्थे तनयेन साकम् ॥९८॥ [1]ततश्च वामेतरमक्षि शश्व-द्धीमोहनस्यास्फुर-दिष्टशंसि ॥ चाषश्च वामे ददृशे विहङ्ग-वृन्दं द्रुमाग्रे मधुरं चुकूज ॥ ९९ ॥ [2]इति शुभशकुनैस्तावीषदाश्वास्यमानौ ययतुरनुपमानं पत्तनं नागपूर्वम् ॥ वसतिमुपगतावालोक्य तौ रूपचन्द्र-चरणयुगमनूता-मस्तचिन्तार्तिशोकौ ॥१००॥ अवददथ स पुत्रं पादयोर्न्यस्य तेषां ब-दर इममनाथं पुत्रवद्रक्षतेति॥बदर तनयमेनं विद्धि राजासनस्थं कि-मपि न कुरु चित्तेऽशातमूचुस्त एवम्॥१०१॥ इति वचनसुधां स श्रो-

१ उपजातिश्छन्दः । २ इतस्त्रयस्य मालिनी छन्दः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रपेयां निपीय सपदि सुतसमुत्थं मोदमुत्सार्य दूरम्॥ अगमदनुमतः
श्रीरूपचन्द्रैः स्वगेहं विगलितसलिलाम्भोवाहवत्सारहीनः ॥१०९॥

इति श्रीत्पदवाक्यप्रमाणपारावारीण-विद्वन्मुकुटालंकार-श्रीबालकृष्णनग-
वच्चरणारविन्दमिलिन्दायमानान्तेवासिनः कानडोपाह्व-गोविन्दात्मज-दा-
मोदरस्य कृतौ शाङ्के मोहनचरिते नागपुरागमनं नाम द्वितीयः सर्गः ॥ २ ॥
॥ श्रीः ॥ नमः सिद्धेभ्यः ॥ शङ्काकाङ्क्षादिरहितं दर्शनं यः प्रपन्न-
वान् ॥ तस्मै मुक्तिपदं दत्ते यः स जीयादनारतम् ॥ १ ॥ प्राप्य ना-
गपुरश्रीः श्री-मोहनं शुशुभे तराम् ॥ शारदी पूर्णमासीव कलापूर्णं
कलानिधिम् ॥ २ ॥ चन्द्रालोकाद्वर्धतेऽब्धिः परमेतन्महाद्भुतम्॥ यद्रू-
पचन्द्रो ववृधे मोहनास्येन्दुदर्शनात् ॥ ३ ॥ रूपचन्द्रा अयो यद्य-



For Private and Personal Use Only

दन्निलेपुः सुलक्षणम् ॥ तत्तत्प्रायो व्यलोकन्त मोहने मोहमुद्गरे ॥४॥
अनुरूपविनेयस्य लाभाद्यज्जायते सुखम्॥ द्वावेव तद्विजानीतो केवली
गुरुरेव च ॥ ५ ॥ अध्यापयामासुरिमं रूपचन्द्रा यथा यथा ॥ तथा
तथैषा ववृधेऽ–ध्यापनेच्छा गुणेक्षणात् ॥ ६ ॥ पपाठ मोहनो रूप–
चन्द्रप्रोक्तं यथा यथा ॥ तथा तथा पिपठिषा ववृधेऽस्यापि शोभना
॥ ७ ॥ शिष्यप्रज्ञाध्यापकस्या–ध्यापने कौशलं द्वयम् ॥ लावण्यं
यौवनेनेव संपृक्तमशुभत्किल ॥ ८ ॥ प्रतिक्रमणसूत्रादि तथौपयिक-
मेव यत् ॥ तत्सर्वं स्वल्पकालेन मोहनोऽपठदञ्जसा ॥ ९ ॥ उदारः
कल्प एवायं यन्महाव्रतधारणम् ॥ सुदुश्चरं दुश्चरेषु तेषु तुर्यं व्रतं
विदुः ॥ १० ॥ यदि तन्निरतीचारं तर्हि सद्गुरुसेवया ॥ शेषाणि यानि

चत्वारि लभ्यन्ते तानि निश्चितम् ॥ ११ ॥ ध्यात्वैवं प्राङ् मोहनाय
रूपचन्द्रा गुणैर्भवः॥ दातुमैच्छन्यतेर्दीक्षां सन्महाव्रतलब्धये ॥ १२ ॥

संवीक्ष्य द्रव्यक्षेत्रादि पुनर्विममृशुस्ततः॥ षोडशेऽब्देऽस्य दीक्षायाः
कालं ते प्रतिपेदिरे ॥ १३ ॥ भङ्गस्तयातिचारश्चो–त्पद्यते नवमाब्द-
तः ॥ यद्यप्युपान्त्यं त्यक्त्वान्य–सद्व्रतानां प्रमादतः॥ १४ ॥ तुर्यव्रते
तथाप्येतौ यावदब्दं हि षोडशम् ॥ प्रायः संभवतो नैवे–त्येतल्लोके-
ऽपि विश्रुतम् ॥ १५ ॥ एतस्यां यतिदीक्षायां मुख्यं तुर्यं व्रतं विदुः॥
यतस्तदितराण्यस्यां प्रायः सन्त्यपि सन्ति नो ॥ १६ ॥ तथापि यति
दीक्षा य–दीयते नवमेऽब्दके॥ तत्पूर्वाभ्याससिद्ध्यर्थं पूर्वाभ्यासो हि
दुर्लभः॥ १७ ॥ वीरः स्वयं न यः सोऽत्र सेनाबलमपेक्षते॥ तथेन्द्रि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदमाशक्तः पूर्वाभ्यासमनिन्दितम् ॥ १८ ॥ मोहनोऽयं स्वयं शूरः पूर्वाभ्यासोऽत्र किंफलः ॥ इतीव चिन्तयित्वा ते जगदुः षोडशेऽस्य ताम् ॥ १९ ॥ रूपचन्द्राशयं ज्ञात्वा मोहनोऽपि यथामति ॥ पपाठ पठनासक्तो दण्डकादीन्यथाक्रमम् ॥ २० ॥ एवं दिनानि कतिचि-त्त-योर्निवसतोः सुखम् ॥ मिथो गुणानुरागोऽभू-दुचितं हि सतामिदम् ॥ २१ ॥ एकदा सुप्रभाते ते रूपचन्द्रा व्यचिन्तयन् ॥ अत्रैव वसतिः श्रेय-स्यथवा विहृतिः खलु ॥ २२ ॥ चिरमेकत्र वसते-र्मनःसंगो हि जायते॥ स एव भवसंतत्या मूलं मुनिभिरुच्यते ॥२३॥ विहारे सन्ति बहवो गुणा लोकद्वये सुखाः॥ तस्मात्स एव कर्तव्य इहामुत्र सुखेप्सु-भिः ॥२४॥ नानाविधेषु देशेषु पुमांसः पर्यटन्ति ये ॥ निपुणा जायते

For Private and Personal Use Only

तेषां मतिर्व्यवहृतौ किल ॥ २५ ॥ व्यवहारचणा ये ते निश्चयेऽपि विचक्षणाः ॥ व्यवहारं विना यन्न निश्चयो लभते पदम् ॥२६॥ कदा कथं वर्तितव्यं कथं दुःखं सहेत च ॥ कथं व्यवहरँल्लोके सर्वेषां वल्लभो भवेत् ॥ २७ ॥ कस्मिन् जनपदे जान–पदा बीजेन केन वा ॥ कृषिवाणिज्यनिरताः संपन्नाश्च निरामयाः ॥ २८ ॥ कस्मिन् देशे निमित्तेन केन वा तन्निवासिनः ॥ प्राज्ञाः शूरतमाश्चापि दौर्गत्येन निपीडिताः ॥ २९ ॥ को वा जनपदाधीशः केन लोकोत्तरेण वा ॥ गुणेन सर्वलोकानां विद्यते प्रीतिभाजनम् ॥ ३० ॥ को वा जनपदाधीशः केन दुर्व्यसनेन वा ॥ द्विष्टः प्रजानां सर्वासां विद्यतेऽत्यन्तदुर्मनाः ॥ ३१ ॥ को वा जनपदो वास–योग्यः सद्धर्मलाभतः ॥ को वा पाखण्डिबाहुल्या–



For Private and Personal Use Only

-र्मलोपकरोऽहितः ॥ ३२ ॥ को वा जनपदः केन सदाचारेण सत्फ-
लम् ॥ को वाचारेण दुष्टेन फलं लेभेऽतिदुःखदम् ॥३३॥ पुरावृत्तप्र-
सिद्धानि यदा स्थानानि पश्यति ॥ तदैवं सूक्ष्मया बुद्ध्या विवेकं ल-
भते बुधः ॥ ३४ ॥ किंनामेदं स्थलं कस्य कर्मणा केन विश्रुतम् ॥ त-
स्मात्स किं यशो लेभेऽ-थवा गर्हामवाप्तवान् ॥३५॥ नानाधर्मरतान्
नाना-विधजातिकुलान्वितान् ॥ पर्यटन्विविधान्देशा-नेतद्विज्ञानम-
श्नुते ॥ ३६ ॥ (उक्तं च) लाघवं कर्मसामर्थ्यं दीप्तोऽग्निर्मेदसः क्षयः ॥
विभक्तघनगात्रत्वं व्यायामादुपजायते ॥३७॥ आलोच्यैवं रूपचन्द्रा
आगमोक्तं च लौकिकम् ॥ विहारफलमत्रस्ता निश्चिक्युस्तं परेद्यवि
॥ ३८ ॥ विहारमात्मना सार्धं रूपचन्द्रा विधित्सवः ॥ विज्ञायैतन्मो-

हनोऽपि मुमुदे मोहमोहनः ॥ ३९ ॥ मुहूर्ते निश्चिते रूप-चन्द्रा मो-
हनसंयुताः ॥ प्रतस्थिरे सुप्रशस्तैः शकुनैर्विकसन्मुखाः ॥ ४० ॥
॥२०॥ दक्षिणस्यां जनपदा दक्षिणाः सन्ति सूरयः ॥ इतीव तां प्रति ययु-
र्दाक्षिण्यं हि सतां प्रियम् ॥ ४१ ॥ यथासुखं ते पन्थान-मतिक्रामन्त
श्चाययुः ॥ स्थाने स्थाने वन्दमाना-श्चैत्यान्यमलया धिया ॥ ४२ ॥
दिनैः कतिपयैरूप-चन्द्राः श्रीमोहनोऽपि च ॥ प्रह्लादनपुरं नाम सा-
ह्लादैरार्हतैर्भृतम् ॥ ४३ ॥ युग्मम् ॥ गूर्जराणामुदीचीना-वाचीना म-
रुनीवृतः ॥ सीमा यदुच्यते लोके पालनादिपुराख्यया ॥ ४४ ॥ तत्र-
स्थजिनचैत्यानां परिपाटीं विधाय ते ॥ स्तोकमेवावसंस्तत्र पुरतो ग- ॥२०॥
न्तुमुत्सुकाः ॥४५॥ प्रातः प्रह्लादनपुरात् प्रस्थितास्तेऽथ दक्षिणाम् ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गूर्जराणां श्रियं रम्या–मपश्यन्हृदयंगमाम् ॥४६॥ पार्श्वयोश्चम्पका-
शोक–पाटलाबकुलार्जुनान् ॥ जम्बीरजम्बूनारङ्ग–दाडिमामलका-
दिकान् ॥ ४७ ॥ कपित्थबदरीचिञ्चा–रसालखदिरादिकान् ॥ हिंताल-
तालखपुर–नारिकेलतमालकान् ॥ ४८ ॥ मल्लिकायूथिकाझिएटी–सु-
रसाप्रस्थपुष्पकान् ॥ वासन्तीमालतीकुन्द–मुचुकुन्दकुरएटकान् ॥ ४९ ॥
उद्यानान्तर्वर्तमाना–नेवं नानाविधानगान् ॥ शाकुन्तध्वानमुखरान्
वीक्षमाणाः क्वचिन्मुदा ॥ ५० ॥ क्षेत्रेषु शालिगोधूम–कर्पासतुवरी-
मुखाः ॥ परिपक्वा ओषधीश्च प्रेक्षमाणाः पदे पदे ॥ ५१ ॥ क्वचिन्मा-
लेऽकृष्टपच्या–न्नीवारादीन्मनोहरान् ॥ आरण्यकान्नूरुहांश्च कुर्वाणा

१ क्षेत्रविशेषः । 'माळ' इति महाराष्ट्र्यां प्रसिद्धमिति केचित् ।

For Private and Personal Use Only

दृष्टिगोचरान् ॥ ५२ ॥ कुमुदैर्लीनमधुपैः पद्मैर्गुञ्जन्मधुव्रतैः ॥ निनद-
द्भिश्चक्रवाकै-श्चकोरैः सारसैस्तथा ॥ ५३ ॥ विविक्तत्वाज्जलं पातु-
मागतैर्हरिणादिभिः॥मनोरमं सरो वीक्ष्य क्वचिद्विकसिताननाः॥५४॥
चञ्चूपुटेन हरितान् शालीनादाय वप्रतः॥ वृक्षाग्रेषूपविशतः शुकान्
दृष्ट्वा मुदं गताः ॥ ५५ ॥ रूपचन्द्रा मोहनेन सार्धमेवं यथासुखम् ॥
विहरन्तः क्रमादापु-र्नगरं राजपूर्वकम्॥ ५६ ॥ कुलकम् ॥ यत्रान्य-
शासनरतै-रपि जैनजनैरिव ॥ प्राणातिपातविरतिः पाल्यते स्वयमेव
हि ॥ ५७ ॥ उद्दीपयन्तः श्रीवीर-शासनं निजतेजसा ॥ देवचन्द्राद-
योऽभूवन् बहवो यत्र संयताः ॥ ५८ ॥ श्रेष्ठिनोऽपि श्रेष्ठतरा यत्रो-

१ क्षेत्रतः। प्राकारक्षेत्रयोर्वप्र इत्यभिधानम्।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भवमवाप्नुवन् ॥ नूजानयोऽपि बहवो येषामासन् वशंवदाः ॥ ५९ ॥
चतुर्विधोऽपि श्रीसंघो महान्यत्राद्य वर्तते ॥ जिनालयास्तथासेचं-
नकाः सन्ति परःशताः ॥ ६० ॥ एवंविधं रूपचन्द्रा अवलोक्य वरं
पुरम् ॥ विधातुं तत्र वसतिं मनश्चक्रुः समाहिताः ॥ ६१ ॥ तेषामा-
शयमालक्ष्य मोहनोऽनुससार तान् ॥ चन्द्रमेव हि चन्द्रस्य करोऽ-
न्वेति नचेतरम् ॥ ६२ ॥ मोहनेन समं तत्रो-पाश्रये दोषवर्जिते ॥
तस्थिवांसो रूपचन्द्रा धर्मध्यानं वितेनिरे ॥६३॥ चैत्यानां परिपाट्या
च गहनागमचिन्तया ॥ मोहनाध्यापनेनापि तेषां कालो विनिर्ययौ
॥ ६४ ॥ मोहनो रूपचन्द्राणां सेवया पठनेन च ॥ कालं निर्यापया-

---

१ तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनादित्यमरः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मास चैत्यानां वन्दनेन च ॥ ६५ ॥ एवं यथासुखं तत्र तेषां निवसतां सताम् ॥ निरगादपरिज्ञात इवैकः परिवत्सरः ॥ ६६ ॥ विहर्तुकामाः पुरतो रूपचन्द्रास्ततोऽभवन्॥मोहनोऽप्येकत्र वासा-भन्तुमुत्कमना अभूत् ॥ ६७ ॥ निजाशयानुकूलं ते मोहनं गुणमन्दिरम् ॥ परिज्ञाyाहनि शुभे शस्ते लग्ने प्रतस्थिरे ॥६८॥ विहरन्तः समासेदुः क्रमात्ते भृगुपत्तनम् ॥ सुव्रतस्वामिपादानां निवासेन पवित्रितम् ॥ ६९ ॥ यत्प्राचीनं क्षेत्रमाहु-र्यस्मिन् भव्यजना घनाः॥ आर्षं धर्मं समाराध्य सद्गतिं समवाप्नुवन् ॥ ७० ॥ तत्रापि चैत्ययात्रादि विधायाग्रे यियासवः ॥ रेवामुत्तीर्य विषये दक्षिणे ते पदं न्यधुः॥ ७१ ॥ महाराष्ट्रान्तर्गतं यत् कोंकणाख्योपवर्तनम्॥सीमामुदग्भवां तस्य पश्यन्तस्ते मुदं

१ देशविषयौ तूपवर्तनमित्यमरः।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ययुः ॥७२॥ ततः सूर्यपुरं नाम पुरं लोकेऽति विश्रुतम् ॥ प्राविशन्रूपचन्द्रा यत् समृद्धैरार्हतैर्युतम् ॥७३॥ यत्पूर्वमासीत्सामुद्र–व्यापारेण समृद्धिमत् ॥ देशान्तरायातपण्यो–त्तरणस्थानमेककम् ॥ ७४ ॥ तत्रापि पूर्ववद्यात्रां कृत्वा प्रास्थिषताग्रतः ॥ कोंकणानां श्रियं रम्यां पश्यन्तः पार्श्वयोर्द्वयोः ॥ ७५ ॥ मुम्बापुरीं कतिपयै–र्दिवसैस्ते समाययुः ॥ या मोहमय्याख्ययापि प्रथिताखिलभूतले ॥ ७६ ॥ सांप्रतं दक्षिणार्धे य–द्राजधानीत्रयं विदुः ॥ या तत्रोद्यमबाहुल्या–त्समृद्ध्या च विशिष्यते ॥७७॥ सांप्रतं सन्ति यावन्तः ख्याता जनपदा भुवि ॥ तेषां यया समं भूयान् व्यवहारोऽस्ति संप्रति ॥ ७८ ॥ देशान्तरेऽद्य यत्किंचि–त्सत्पण्यं कुशलैर्नरैः ॥ निर्मीयते तदायाति यस्यां प्रथमम-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ज्ञसा ॥७९॥ जातयः सन्ति यावन्त्यो धर्मा यावन्त एव च ॥ तद्धर्मी-
यास्तथा तज्जा-तीयाश्चाधिवसन्ति याम् ॥ ८० ॥ यत्तुल्या नास्ति
नगरी भारते विश्रुतेऽधुना ॥ शोभां यदीयामालोक्य नरः स्वर्गे नि-
रादरः ॥ ८१ ॥ अतिक्रामति यः क्रोशान् मुहूर्ताद्दश पञ्च च ॥ स-
बाष्पशकटो यस्याः संप्रति व्यासमासदत् ॥८२॥ या योजनसहस्राणां
पृथक्त्वमपि लङ्घते ॥ निमिषेणापि सा विद्यु-त्तन्त्री लोकोत्तरस्यदा
॥ ८३ ॥ चीनपारसशर्मण्या-इङ्ग्लादिदेशेषु भूरिषु ॥ आर्यावर्तेऽपि
विस्तारं यतः सांप्रतमागमत् ॥ ८४ ॥ तत्र श्रीरूपचन्द्रास्ते मोहनेन
समं मुदा ॥ न्यवसन् वसतौ धर्म-ध्यानं तन्वन्त आत्मनि ॥ ८५ ॥ ॥२३॥
कारणेऽथ समुत्पन्ने मोहनेन सहान्यदा ॥ गत्वा मालवके मुम्बा-पुरीं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुनरुपागमन् ॥ ८६ ॥ एवं द्विस्त्रिर्मालवके गत्वा पुनरुपेयुषाम् ॥ तेषां चतुष्टयी जग्मु-र्वत्सराणां यथासुखम् ॥ ८७ ॥ मोहनोऽपि पठन् पञ्च-दशवर्षोऽभवत्तदा ॥ रूपचन्द्रास्तमालोक्य चेतस्येवमचिन्तयन् ॥ ८८ ॥ मया यत्प्रागवधृतं तस्यायं समयोऽभ्यगात् ॥ मोहनोऽयं पञ्चदश-वर्षो यत्समजायत ॥ ८९ ॥ देयास्मै यतिदीक्षा सा श्रीपूज्यैरेव दीयते ॥ तेषां योगश्च मगसी-पार्श्वोपान्ते भविष्यति ॥ ९० ॥ एवं विमृश्य क्षणादावसाने शस्ते मुहूर्तेऽपि च मोहनं ते ॥ प्रस्थापयामासुरुदारसत्त्वं मुहुः पठन्तः परमेष्ठिमन्त्रम् ॥ ९१ ॥ मुम्बापुरात्स्थानकमग्रतः स ग्रामेष्वनेकेषु वसन्समागात् ॥ ख्यातं जनस्थान[1]-

---

१ जनस्थानं 'नाशीक' इति प्रसिद्धम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मथो सुरम्यां रेवां समुत्तीर्य पुरश्चचाल ॥९२॥ अथेन्द्र[1]पूर्वं पुरमभ्यु-
पागा-द्यद्दाक्षिणात्यो नृपतिः प्रशास्ति ॥ यदध्यवात्सुर्विहरन्त आ-
गता-स्तदा गणाधीशमहेन्द्रसूरयः॥ ९३ ॥ आकर्ण्य ते मोहनमभ्यु-
पेतं बभूवुरुत्कास्तमवेक्षितुं द्राक्॥ आयातमात्रः स महेन्द्रसूरीन् नन्तुं
समागाद्विधुतान्यकृत्यः ॥ ९४ ॥ खरतरगच्छाधिपति-श्रीपूज्यानां प-
दारविन्देषु॥ पतितो मोहनभृङ्गो मोदममानं समापेदे ॥९५॥ उत्थाप्य
शीघ्रमेनं सास्त्रं चक्रुः प्रमृज्य पाणिभ्याम्॥ देवसुगुरुप्रसादा-त्स्वस्त्य-
स्त्विति सूरयः प्रोचुः ॥ ९६ ॥ आदाय मोहनमथेन्द्रपुरात्प्रयाता-
स्ते सूरयः सुखमवापुरवाप्तमोदाः॥ पार्श्वं च पार्श्वमहितं मगसीप्रतिष्ठं
घोरे कलावपि भुवि प्रथितानुभावम्॥ ९७ ॥ अदीक्षयन्ये यतिरूप-

[1] इंद्रपुरं 'इंदोर' इति प्रसिद्धम् ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चन्द्रान् पट्टेऽथ तेषां क्रमतोऽभवन्ये ॥ ते खल्विमे सूरिवरा महेन्द्रा- स्तीर्थं तथैतद्विदितं पृथिव्याम् ॥ ९८ ॥ योगैः खल्वयमीदृशो न सुलभो भाग्याद्विना देहिनाम् प्राग्जन्मार्जितधर्मकर्मवशातस्तं मोह- नोऽभ्यागमत् ॥ प्राप्याथो सुमुहूर्तमागममतादाचार्यवर्या यति-दीक्षां ते विदितां दधुर्गुणकरीं श्रीमोहनाय द्रुतम् ॥९९॥ जगति यतिदीक्षां सुप्रापां विचिन्त्य सुखप्रदाम् बहव उररीकृत्य प्रान्ते पतन्ति पथो हि- तात् ॥ विरल इह तामादाय प्राग्विवेकबलादथो भवति किल संवेगी धन्यः स एव महीतले ॥१००॥ इति श्रीमत्पदवाक्यप्रमाणपारावारीण-वि- द्वन्मुकुटालंकार-श्रीबालकृष्णभगवच्चरणारविन्दमिलिन्दायमानान्तेवासिनः कानडोपाह्वगोविन्दात्मजदामोदरस्य कृतौ शाङ्के मोहनचरिते तृतीयः सर्गः ३

१ उपेन्द्रवज्रा छन्दः । २ शार्दूलविक्रीडितं छन्दः । ३ हरिणी छन्दः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ श्रीः ॥ नमः सिद्धेभ्यः ॥ शं तनोतु स वः शान्ति–र्नाकिनाथनम-
स्कृतः ॥ स्वर्गापवर्गयोर्दाता निहन्ता सकलापदाम् ॥ १ ॥ अथ श्री
मोहनेनात्त–यतिदीक्षेण सूरयः॥ सहागमन्नन्तरिक्ष–पार्श्वपार्श्वं मुदा
युताः ॥ २ ॥ यथोचितां तत्र यात्रां विधायाजग्मुरञ्जसा ॥ पुरं [1]भूपा-
लनामानं यत्रास्ते यवनो नृपः ॥ ३ ॥ दिनानि कति चित्तत्र स्थित्वा
ते सूरयोऽन्यदा ॥ श्रीमोहनाय मुम्बायां गन्तुमाज्ञां वितेनिरे ॥ ४ ॥
श्रीमोहनोऽपि लब्ध्वाज्ञां निश्चक्राम ततः पुरात् ॥ मुम्बापुरीं क्रमा-
दाप रूपचन्द्रदिदृक्षया॥ ५ ॥ दृष्ट्वा श्रीमोहनं रूप–चन्द्रा मोदमवा-
प्नुवन् ॥ सोऽपि प्रभृति दीक्षाया वृत्तं सर्वमचीकयत् ॥ ६ ॥ ततस्तो-

१ 'भोपाळ' इति भाषायां प्रतीतम्।



For Private and Personal Use Only

कमुषित्वा ते मुम्बायामार्हतश्रियाम् ॥ श्रीमोहनेन नृपालं प्रयातुं
निरचिन्वत[1] ॥ ७ ॥ प्रस्थिताः सुमुहूर्ते श्री–मोहनेन समं मुदा ॥
रूपचन्द्राः क्रमादापु–र्नृपालं नृपराजितम् ॥ ८ ॥ प्रसन्नमनसस्तत्र
रूपचन्द्रा अथावसन् ॥ न्यवात्सीच्छ्रीमोहनोऽपि पठन्नागममादरात्
॥ ९ ॥ समीक्ष्यासन्नमथ ते वर्षासमयमागतम् ॥ तत्रैव वर्षावसतिं
निश्चिक्युश्च समोहनाः ॥१०॥ देवानां च गुरूणां च प्रसादात्ते यथा-
सुखम् ॥ प्रावृषं गमयामासु–स्तन्वन्तस्तपआदिकम् ॥ ११ ॥ रूप-
श्रिया स्पर्धमाना गुणश्रीर्ववृधे तराम् ॥ यौवनश्रीरपि परा–जिग्ये
तस्य गुणश्रिया ॥ १२ ॥ एवं प्रवर्धमानः स–द्गुणैः श्रीमोहनस्तदा ॥

---

१ निश्चयं चक्रुः ।

For Private and Personal Use Only

समाचकर्ष चित्तानि विदुषामपि लीलया ॥ १३ ॥ गमनावसरं ज्ञात्वा रूपचन्द्राः सदोद्यताः ॥ मोहनेन समं मुम्बा–माजग्मुः स्वःपुरीनिभाम् ॥ १४ ॥ मुम्बायाः सुषमां दृष्ट्वा–भिनवामिव मोहनः ॥ मेने तस्या मोहमयी–त्याख्यामनुगतार्थकाम् ॥ १५ ॥ तस्या विपण्यां वणिजो वाणिज्ये बहुशोऽन्वहम्॥ दुःस्था भवन्ति संपन्नाः संपन्नाश्चापि दुर्गताः ॥ १६ ॥ दृष्ट्वा विपर्यासमिमं निश्चिकाय स चेतसि ॥ संपदश्चञ्चलेत्याख्या–मन्वर्थामागमोदिताम् ॥१७॥ तृणीकृतस्वर्गसुखान् धनिनो धनदोपमान् ॥ शतखण्डांशुकधरान् याचमानांश्च दुर्गतान् ॥ १८ ॥ वीक्ष्य सोऽन्तर्निरणयद् धर्माधर्मफलं श्रुतम् ॥ धर्मात्सुखं बहुविध–मधर्माद्दुःखमीदृशम् ॥१९॥ युग्मम् ॥ राजमार्गान्तिकस्थेषु

सौधानां मूर्धसद्मसु ॥ श्रीमोहनोऽधिरुह्याध्व–चरान्पश्यन्नचिन्तयत् ॥ २० ॥ पिपीलिकानिभा एते शतशोऽथ सहस्रशः ॥ गच्छन्त्यनेन मार्गेण नरा नार्यश्च संततम् ॥२१॥ श्रेष्ठोऽहं जगतीत्येवं सर्वे यद्यपि मन्वते ॥ तथाप्येषामसारत्व–मधुना स्फुटमीक्ष्यते ॥ २२ ॥ असारे मानवे देहे सारं धर्ममतो विदुः ॥ तस्मात्स एव सततं सेवनीयः सतां मतः॥२३॥ एवं मुम्बापुरीशोभा–मालोक्याध्यात्मभावनाम् ॥ श्रीमोहनो वितन्वानो गमयामास वासरान् ॥ २४ ॥ वयस्यैः श्रीमोहनस्य कथितां भावनामिमाम् ॥ रूपचन्द्राः परिज्ञाया–मानं मोदमवाप्नुवन् ॥ २५ ॥ आसन्नां प्रावृषं वीक्ष्य रूपचन्द्राः समोहनाः ॥ उत्तरस्यामथाशायां गन्तुकामास्तदाभवन् ॥ २६ ॥ उदीच्यां कुत्र

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गन्तव्य–मेवं ते हृदयेऽन्यदा ॥ चिन्तयन्तो मालवस्या–स्मार्षुर्नरत-
हन्मणेः ॥ २७ ॥ मा संपूर्णास्ति मय्येवा–न्येषु देशेषु मालवः ॥ एवं
 योऽहर्निशं जल्प–न्नाप मालवनामताम् ॥२८॥ गानवादनचञ्चुत्वा–
ज्ञानाम्नायेऽपि योऽद्भुताम् ॥ रागेषु गणनां लेभे स्थाने ध्यानात्तदा-
त्मता ॥२९॥ गन्तव्यं तत्र सत्रा श्री–मोहनेनाविलम्बितम् ॥ निर्णी-
येति शुभे लग्ने प्रस्थानं चक्रिरेऽथ ते ॥ ३० ॥ क्रमेण मालान्यमला–
न्यज्ञात्कुर्मालवस्य ते ॥ संपन्नता तस्य यदा–लोकेनैवानुमीयते ॥३१॥
ग्रामानुग्राममथ ते निवसन्तः समाययुः ॥ राजधानीं मालवस्यो–ज्ज-
यिनीं विजयावनिम्॥ ३२ ॥ विख्यातविक्रमो विद्या–विदितो विद्वदा- 
श्रयः॥ वदान्यः कल्पतरुवद् यामपाद्विक्रमो नृपः ॥३३॥ पश्चात्क्रमेण

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ये भद्रा-सनं तस्याधिशिश्रियुः ॥ तेषां नैकोऽपि तद्धर्मं व्यतीयाय शुभावहम् ॥ ३४ ॥ शासनोन्नतिकर्तुः श्री-सिद्धसेनमुनेर्वचः ॥ सत्यं चिकीर्षुः श्रीपार्श्वो यस्यां प्राकट्यमागमत् ॥ ३५ ॥ तत्त्वार्थोद्द्योतमातन्वन् भव्याज्ञानतमोनुदम् ॥ यथार्थनामा यत्रासी-त्सिद्धसेनदिवाकरः॥३६॥ शोभनो नाम यत्राभू-न्मुनिराडतिविश्रुतः॥ धनपालं व्यधात्सम्यग्-दृष्टिं स विविधोक्तिभिः॥३७॥ यस्यामुपात्तजन्मासौ धनपालो महाकविः ॥ धारायामाखेटरतं यदधीशमबोधयत् ॥ ३८ ॥ तामालोक्यावदन्रूप-चन्द्राः श्रीमोहनं तदा ॥ अत्रैव वर्षावसतिः कर्तव्येति मतं मम ॥ ३९ ॥ श्रीमद्भ्यो यद्रोचते त-न्मह्यमेवं प्रतिब्रुवन् ॥ मोहनः श्रीरूपचन्द्र-वचनं प्रत्यपद्यत ॥ ४० ॥ उपद्रवैर्विर-

For Private and Personal Use Only

हितेऽ–ध्युषितास्ते प्रतिश्रये ॥ तत्रातिवाहयामासु–र्वर्षामासचतुष्टयीम् ॥ ४१ ॥ अष्टादशाब्ददेशीयो मोहनोऽपि शुभैर्गुणैः ॥ गुणानुरागिणां तत्र स्पृहणीयोऽभवन्नृशाम् ॥ ४२ ॥ न प्रगल्भं वयो नापि श्रुते पारीणता तथा ॥ तथापि मोहने भव्य–जीवा रागं दधुस्तदा ॥ ४३ ॥ आसन्नेऽवसरे रूप–चन्द्रा निश्चिक्युरन्यदा ॥ विहारमविलम्बेन पत्तने कोट्टनामके ॥ ४४ ॥ मोहनोऽस्मान्परित्यज्य विहर्ता किल सांप्रतम् ॥ मत्वेति तत्रत्याः श्राद्धा विषादं परमाययुः॥ ४५ ॥ वासरे सुप्रशस्तेऽथ रूपचन्द्राः प्रतस्थिरे ॥ मोहनोऽपि नमोऽर्हद्भ्य इत्युक्त्वानुससार तान्॥ ४६ ॥ अश्रान्तं विहरन्तस्त आययुः कोट्टपत्तनम् ॥ मनःप्रसत्तिदायां च वसतावबसन्मुदा ॥ ४७ ॥ महेन्द्रसू-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रयस्तत्र विहरन्तः समाययुः ॥ रूपचन्द्रान्मोहनं च दृष्ट्वा मुमुदिरे तराम् ॥ ४८ ॥ परिच्छदपरीतानां सूरीणां समुपेयुषाम् ॥ वितेनुः समुदाचारं यथार्हं ते विचक्षणाः ॥४९॥ आगामिवर्षावसतिं चिकीर्षन्ति स्म तत्र ते ॥ श्रीपूज्यवचनाद्यस्मा–न्मन्तव्यं महतां वचः ॥ ५० ॥ देवगुर्वोः प्रसादेन प्रत्यूहेन विनैव ते ॥ चतुर्मासीं तत्र निन्यु–स्तपः-स्वाध्यायतत्पराः ॥५१॥ हेमन्तेऽथ समायाते तेषां जिगमिषाऽभवत् ॥ गोपालनगरे चक्रु–र्निश्चयं विहृतेस्तदा ॥ ५२ ॥ शिवो नाम प्रतीतोऽभू–न्नृपतिर्दक्षिणापथे॥निर्वास्य यवनान्येन साम्राज्यं विदधे पुरा ॥५३॥ मुख्यामात्यस्तस्य बाजी–नामासीदतिविक्रमी ॥ तस्य शिन्दोपनामाऽभू–द्राणोजी नाम सद्भटः ॥ ५४ ॥ प्रभुप्रसादादभव–त्स सा-

For Private and Personal Use Only

मन्तशिरोमणिः ॥ मण्डलान्तर्वर्ति चेद–मध्युवास पुरं वरम् ॥ ५५ ॥
तदन्वयभवा नृपा अद्य यावदिदं पुरम् ॥ पालयन्ति प्रजापीडा–ह-
रणे विहितादराः ॥ ५६ ॥ महेन्द्रसूरयो रूप–चन्द्राः श्रीमोहनोऽपि
च ॥ विदधुर्विहरन्तोऽथ तत्रैव वसतिं क्रमात् ॥ ५७ ॥ स्थित्वा तत्र
चतुर्मासी–मग्रे तेऽथ यियासवः ॥ प्राङ्मुखा विहरन्ति स्म कृत्वा वा-
राणसीं हृदि ॥ ५८ ॥ पूतापि या श्रीपार्श्वाव–तारेणापूयताधिकम् ॥
तीर्थान्तरीयैरपि या वाग्देवीपीठमुच्यते ॥ ५९ ॥ भैरवो भ्राजते गङ्गा
वहते वसतीश्वरः॥ अन्नपूर्णा प्रणात्यन्नै–स्तारकस्तारकस्तथा ॥६०॥
सामग्र्येवंविधा यस्यां तदेतत्क्षेत्रमुत्तमम् ॥ सेवनीयं प्रयत्नेने–त्येवं
वेदविदो विदुः ॥ ६१ ॥ युग्मम् ॥ निरन्तरायमुल्लङ्घ्य मार्गमागत्य तां



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुरीम् ॥ वसतिं सपरीवाराः सूरयः समुपाविशन् ॥ ६२ ॥ कांश्चिद-ज्ञानकष्टं च सकामां निर्जरां तथा ॥ कांश्चिदाचरतो वीक्ष्य सूरय-स्तोषमासदन् ॥६३॥ प्रसन्नमनसो रूप-चन्द्राः श्रीमोहनोऽपि च ॥ महेन्द्रसूरिसांनिध्या-त्काशीमध्यवसन्मुदा ॥ ६४ ॥ पिपठीर्मोहनो वारा-णसी विद्यासुधानिधिः ॥ योगोऽयं दुर्लभोऽप्यासी-त्सुलभो भाग्ययोगतः॥६५॥ मोहनो विनयी रूप-चन्द्राज्ञां शिरसा वहन् ॥ पठतीति प्रहृष्टाः श्री-सूरयोऽथ प्रतस्थिरे ॥ ६६ ॥ मानयन् रूपच-न्द्राज्ञां कुर्वन्नावश्यकक्रियाम् ॥ पठन्यथाशक्ति शास्त्र-मास्ते श्रीमो-हनो मुदा॥ ६७ ॥ पूर्वं सारस्वतमथो चन्द्रिकां च ततः परम् ॥ गद्य-पद्यात्मकं काव्य-मधीयाय स सत्वरम् ॥ ६८ ॥ पुष्पेभ्यः सारमादत्ते

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथा मधुकरस्तथा ॥ पपाठ मोहनो यद्य—त्सारं तस्याददेऽञ्जसा
॥६९॥ अधीयानस्य तस्यैवं निरगाद्वत्सरद्वयम् ॥ तावता रूपचन्द्राणां
शरीरेऽभूदपाटवम् ॥७०॥ व्योमेन्दुनन्दभूमाने[१९१०] विक्रमादित्यवत्सरे ॥
चैत्रे सिते चैकादश्यां रूपचन्द्रा दिवं ययुः ॥ ७१ ॥ जानानस्यापि
देहादेः क्षणभङ्गुरतां तदा ॥ स्वान्तं श्रीमोहनस्याभू—च्छोकध्वान्तसमा-
कुलम् ॥ ७२ ॥ अपनोदाय तस्याथ शारदारुणसंनिभाः ॥ सूरयः
समुपागत्या—बोधयन्मोहनं तदा ॥ ७३ ॥ सूरीणामुपदेशाच्च काल-
निर्गमनादपि ॥ मोहनः स्वास्थ्यमासाद्य यथापूर्वमथापठत् ॥ ७४ ॥
एकाकी कथमत्रायं स्थास्यतीति विचिन्त्य ते ॥ वाराणस्यां वसन्ति
स्म सदृशं महतामदः ॥७५॥ वत्सरांश्चतुरो याव—दधीते स्म ततोऽ-



For Private and Personal Use Only

प्यसौ ॥ सूरयश्च समावात्सु–स्तावत्कालं निराकुलाः ॥ ७६ ॥ विह-
र्तुमयमेकाकी कल्पते संयतेन्द्रियः ॥ परिज्ञायैवमप्यस्मै विहाराज्ञां
न ते ददुः ॥ ७७ ॥ सार्धं ते मोहनेनाथ पुरे लक्ष्मणनामनि ॥ विजि-
हीर्षव आगामि–दिने निरणयन् गमम् ॥ ७८ ॥ संवेगात्सर्वविरतिं
जिघृक्षुरपि मोहनः ॥ भोग्यं कर्मालोक्य तस्य क्षपणायोपचक्रमे
॥ ७९ ॥ अथासौ लक्ष्मणाभिख्ये पुरे जगति विश्रुते ॥ गन्तुमैच्छद्धी-
महेन्द्र–वचनं परिपालयन् ॥ ८० ॥ वाराणसीवास्तव्या ये–ऽनुरक्ता
मोहनेऽभवन् ॥ ते सर्वेऽपि वियोगोऽस्य भावीति शुशुचुर्भृशम्
॥ ८१॥ साग्रान् षड् वत्सरान्याव–त्काश्यां श्रीमोहनोऽवसत् ॥ राग-
वन्तः परं काल–मिमं क्षणमिवाविदुः ॥ ८२ ॥ दृढानुरागबद्धानां पु-

नर्दर्शनमस्तु ते ॥ इत्येतद्वचनं तस्य श्रुतिगोचरतां ययौ ॥ ८३ ॥ संयोगा विप्रयोगाश्च संसारेऽस्मिन्ननेकशः ॥ अनवन्नवितारश्च कोऽत्र हृष्यति शोचति ॥ ८४ ॥ सद्धर्म एव सद्बन्धु-र्योऽनुयाति नवान्तरम् ॥ गुरुरेव शरण्यो यत् स तारयति संसृतेः ॥८५॥ इत्यागमाविसंवादि-वचनैस्तान्प्रबोधयन् ॥ मोहनश्च महेन्द्राश्च विजहुः समये शुभे ॥ ८६ ॥ यात्रां विधाय गन्तास्मो लक्ष्मणे नगरे वयम् ॥ निश्चित्यैवं तेऽभ्यगच्छ-श्चम्पापापादिषु क्रमात् ॥ ८७ ॥ सत्संगतिश्चाशुभकर्महानि-र्मनःप्रसत्तिर्विविधार्थसिद्धिः ॥ मत्वेति भावेन वितेनिरे ते सत्तीर्थसेवां मनसामलेन ॥८८॥ अथ श्रीसूरयः श्रान्ता विश्रान्तेर्लिप्सयाभ्यगुः ॥ लक्ष्मणे नगरे लक्ष-ध्वजकोटिध्वजाङ्किते

॥८९॥ तत्र श्राद्धानृद्धतमा–नुदारान्धर्मतत्परान् ॥ आलोक्य सूरयो
मोद–ममानमभजंस्तदा ॥९०॥ गुणानुरागिणस्तेऽपि मोहनं गुणम-
न्दिरम् ॥ ज्ञात्वा मुमुदिरे स्थाने गुणज्ञानां गुणे रतिः ॥ ९१ ॥ रूपा-
नुरूपं तच्चित्तं तच्चित्तानुगुणान् गुणान् ॥ गुणानुरूपं विज्ञानं विज्ञाय
मुमुदे जनः ॥ ९२ ॥ यथोचितं यतित्वेऽपि वितन्वन्धर्ममादरात् ॥
मोहनो न्यवसत्तत्र श्राद्धानावर्जयन् गुणैः ॥९३॥ महेन्द्रसूरयः स्तोकं
विज्ञाय निजजीवितम् ॥ कथनीयं यदासीत्त–न्मोहनाय न्यवेदयन्
॥ ९४ ॥ अब्धिभूनन्दधरणी[१९१४]–मितेऽब्दे सूरयोऽनघाः ॥ भाद्रे सिते
च पञ्चम्यां देवभूयं प्रपेदिरे ॥ ९५ ॥ मोहनः सूरिविरहा–त्क्षणं खि-
न्नमना अभूत् ॥ स्वरूपं संसृतेर्ज्ञात्वा ततः संवेगमासदत् ॥ ९६ ॥

यतित्वे यद्विधेयं त–त्संविग्नत्वे न संभवेत् ॥ एवमालोच्य वित्तं स
धर्मकर्मण्ययोजयत् ॥ ९७ ॥ यथा यथायं सद्धर्मे वित्तस्य व्ययमा-
तनोत् ॥ तथा तथैतद्ववृधे धर्मादर्थो हि वर्धते ॥ ९८ ॥ यथायथार्थो
ववृधे तथा धर्मं व्यवर्धयत् ॥ धर्मादर्थोऽर्थाच्च धर्म एतत्सत्यं वदन्ति
हि ॥ ९९ ॥ सूरिपट्टे निधायैकं गात्रं लक्षणलक्षितम् ॥ चातुर्मा-
स्यमथैकं च तत्र निर्वर्त्य मोहनः ॥ १०० ॥ सिद्धाचले गन्तुमना अ-
नवत्सुकृतोदयात् ॥ तावद्गुट्टनमल्लस्य संघः सज्जोऽप्यनूद्भुतम्
॥ १०१ ॥ विज्ञप्तः संघपतिना मोहनो हृष्टमानसः ॥ संघं व्यनूषय-
च्छ्राद्धै–र्धनाढ्यैः परिशोभितम् ॥ १०२ ॥ उदारत्वात्संघपते–र्यान्नू-
द्धर्मोन्नतिस्तदा ॥ निश्चितं सास्मदादीनां वर्तते वागगोचरा ॥१०३॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विक्रमाङ्क[१९१६]सभूनन्द–भूमिते किल वत्सरे॥ मोहनो व्यतनोत्सिद्ध–गिरेः
स्पर्शं महामुदा ॥ १०४ ॥ विधाय यात्रां भूयः स लक्ष्मणे नगरेऽन्य-
गात् ॥ तत्र स्थित्वा चतुर्मासीं पुनस्तीर्थाटनं व्यधात् ॥ १०५ ॥
एवमाचरतस्तस्य द्वादशाब्दी विनिर्ययौ ॥ स्वरूपं संसृतेस्ताव–दजा-
नात्स यथायथम् ॥१०६॥ ववृधे तेन संवेगः स्तोकं यः प्रागवर्तत ॥
तृणराशौ निपतितो–ऽनलोऽनिलवशाद्यथा ॥ १०७ ॥ एकदा सु-
प्रभातेऽसौ चेतसीदं व्यचिन्तयत् ॥ अहो भवेऽस्मिञ्जीवानां सुखं किं
नाम विद्यते ॥ १०८ ॥ न दुर्गते न संपन्ने न भीरौ नापि जित्वरे ॥
न मूर्खे नापि चतुरे सुखमन्यूनमीक्ष्यते ॥ १०९ ॥ वित्तं यदि स्वा-
स्थ्यहेतुः किमेते धनदोपमाः ॥ श्रेष्ठिनो विविधैरेतै–र्दुःखैर्दुन्वन्त्यह-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 



र्निशम् ॥ ११० ॥ निर्धना धनमिच्छन्ति दुर्बला बलमेव च ॥ रोगिणो
रोगहानिं च तृष्णया को न वञ्चितः ॥ १११ ॥ न संतोषसमं सौख्यं
न दानमभयात्परम् ॥ न दयासदृशो धर्म–स्तत्त्वमेतत्सतां मतम्
॥ ११२ ॥ वेदनायाः प्रतीकारः सुखत्वेनाभिमन्यते ॥ सुखं नैसर्गिकं
तेन तिरोभूतं न लक्ष्यते ॥ ११३ ॥ सुखे पौद्गलिके हित्वा रतिमा-
त्मरतिर्भवेत् ॥ यः स धन्यतमो लोके तरंस्तारयते परान् ॥ ११४ ॥
आलोच्यैवं पुनरसौ तीर्थयात्राविधित्सया ॥ विहर्तुमैच्छत्पूर्वस्यां पू-
र्वपुण्यसमीरितः ॥ ११५ ॥ गुणेषु पक्षपातित्वा–च्चिरं परिचयादपि ॥
मोक्तुं न मोहनं शेकुर्लक्ष्मणाख्यपुरस्थिताः ॥ ११६ ॥ बाष्परुद्धग-
लान्सोऽथ भव्यान्मधुरया गिरा ॥ बोधयन्निरगाच्छीघ्रं लक्ष्मणाख्या-



For Private and Personal Use Only

त्पुरादसौ ॥ ११७ ॥ तीर्थानि यावन्तीदानीं पूर्वस्यां प्रथितानि च॥
प्रायः सर्वाणि तान्यागा-न्मोहनोऽघनिवृत्तये ॥ ११८ ॥ मनःप्रस-
त्तिर्यत्राभू-द्वसंस्तत्र यथारुचि॥ कलिकाताराजधान्या-महोभिः कै-
श्चनाभ्यगात् ॥ ११९ ॥ तत्रापि रागिभिः श्राद्धै-र्मान्यमानः स मो-
हनः ॥ उवास कतिचिन्मासा-न्संवेगामलमानसः ॥ १२० ॥ यथा
यथास्य मनसि संवेग उदपद्यत॥ तथा तथा प्रशिथिला-दरोऽभूत्स
परिग्रहे ॥ १२१ ॥ वृथा वाचालतां स्वैर-मीरणं मनसा तथा ॥ सा-
वद्यं चिन्तनं हित्वा सोऽभवद्धर्मचिन्तकः ॥ १२२ ॥ तपस्तपन्नेकदा
स ध्यानलीनमना भृशम् ॥ सर्पं सर्पन्तमद्राक्षीत् पुरो विस्फारिता-
ननम् ॥ १२३ ॥ सहसोन्मील्य नयने परितो यावदीक्षते ॥ न क्वापि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तावद्भुरगो दृशोर्गोचरतां ययौ ॥ १२४ ॥ निध्यायैतच्चित्रमसौ दध्यौ चेतसि विस्मितः ॥ किमिदं शोभनमथा–शोभनं वा भवेदिति ॥ १२५ ॥ श्रुतोपयोगादथ च पारंपर्योपदेशतः ॥ विचार्य निर्णि-नायास्य भूतार्थमिति मोहनः ॥ १२६ ॥ चिरं श्रीपार्श्वनाथस्य चरणौ चिन्तयाम्यहम् ॥ तेन प्रसन्नो नागेन्द्र आत्मानं समदर्शयत् ॥ १२७ ॥ असूचयच्च मामेवं वर्णतोऽहं यथा तथा ॥ कालोऽयं भावतः कालो दशति स्वेच्छया जगत् ॥ १२८ ॥ वृथा तन्मानवभवं मा हार्षीर्बो-धमाश्रय ॥ भवे भवे भुक्तमुक्तान् विषयान्मा भजस्व च ॥ १२९ ॥ अथैकदा भक्त्या–त्कश्चिदागत्य मोहनम् ॥ इच्छामीत्यालाप-मुक्त्वा ववन्दे विधिपूर्वकम् ॥ १३० ॥ श्रुत्वा तमालापमथ सुश्रो-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्यित इवाञ्जसा ॥ मोहनश्चारित्रमोह–नीयद्भेदादचिन्तयत् ॥१३१॥
उद्दिश्य मामिदं वक्ति क्षमाश्रमण इत्ययम् ॥ तन्नामानुगुणाः सन्ति
गुणाः कति हते मयि ॥ १३२ ॥ दुर्लभं मानवभवं मुधा हारितवान-
हम् ॥ लब्धं चिन्तामणिं मौग्ध्या–द्व्यक्रीणां काचमूल्यतः ॥ १३३ ॥
धन्यास्ते शंसनीयास्त आदृतं पालयन्ति ये ॥ मया प्रमादाच्चारित्रं
वृथैव मलिनीकृतम् ॥ १३४ ॥ वित्तं किं नाम मरणा–दुद्धितुं शक्नु-
यान्नरम् ॥ किमर्थं कष्टतोऽप्येत–दर्ज्यते मन्दबुद्धिभिः ॥ १३५ ॥
वसनाशनपानादि–सुखमैहिकमाप्नुयात् ॥ सप्तक्षेत्र्यां च वपना–द्भवे-
दामुष्मिकं फलम् ॥ १३६ ॥ एतद्वित्तफलं चित्ते निधाय तदुपार्ज्यते॥
प्रतिजानाति च नो चारु तथैतदपि मे वचः ॥१३७॥ वसनाशनपानादि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





निरवद्यं च शुद्धिदम् ॥ यावदर्थं हि लोकेऽस्मि–न्पर्यटन्न लभेत किम्
॥ १३८ ॥ सावद्येनोपार्ज्य वित्तं यस्तस्माद्धर्ममिच्छति ॥ पादं पङ्के
मङ्क्त्वा पुनः क्षालयतीह सः ॥ १३९॥ वित्तस्योपार्जनेनेह बध्यते
कर्म यन्नवम् ॥ तदेव धर्मेण नश्ये–त्तत्को नाम नवो गुणः ॥ १४० ॥
हालाहलं विषं नैव वित्तं विषमवेम्यहम् ॥ प्रथमं स्वल्पदुःखाय
द्वितीयं निरयार्तये ॥ १४१ ॥ विषयाणां सेवनेन विषयाशा न शा-
म्यति ॥ नाज्येन वह्निर्निर्वाति किं तु भूयः प्रवर्धते ॥ १४२ ॥ आ मृ-
तेर्यदि सेव्यन्ते विषयास्तर्हि तज्जता ॥ आशैव वर्धते प्रान्ते नान्य-
त्किमपि शिष्यते ॥ १४३ ॥ वार्धके हीनशक्तित्वा–द्विषयान्भोक्तुम-
क्षमः ॥ भोगाशया हि जीवोऽयं व्याकुलीक्रियते भृशम् ॥ १४४ ॥



For Private and Personal Use Only

यथा यथास्य भोगाशा वर्धतेऽयं तथा तथा ॥ विषयैस्त्यज्यते दूरं जरठः कस्य वल्लभः ॥ १४५ ॥ कृत्वास्माल्लोलुपान्प्रान्ते विप्रलभ्य स्वयं यदि ॥ गन्तार एते तर्ह्येषां परित्यागो हितावहः ॥ १४६ ॥ स्वयमेव परित्यक्ताः पुरुषेण विवेकतः ॥ परिबाधां विधातुं हि हतास्ते प्रभवन्ति किम् ॥ १४७ ॥ तस्मात्परिग्रहं सर्वं विहाय विरतिं श्रयेत् ॥ तां विना न भवोत्तारे विद्यते साधनान्तरम् ॥ १४८ ॥ ततो मूर्छां परित्यज्य भवसंततिवर्धिनीम् ॥ संविग्नतां श्रयाम्यद्य-प्रभृत्यात्महितावहाम् ॥ १४९ ॥ निश्चित्यैवं मोहनेन यदासीत्संनिधौ वसु ॥ सर्वं न्ययोजि तद्धर्म-क्रियायामविलम्बितम् ॥ १५० ॥ क्रियोद्धारं विधातुं स देशकालाद्यचिन्तयत् ॥ सर्वं ददर्श सदृशं देशमेकं विना

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदा॥ १५१ ॥वङ्गदेशो श्रावकाणां निवासोऽल्पतरस्ततः॥ तदन्तर्व-
र्तिग्रामेषु विहर्तुं नैव कल्प्यते ॥ १५२ ॥सौराष्ट्रा गूर्जराश्चैव कच्छाश्च
मरवस्तथा ॥ एते विहर्तुं संविग्नैः शक्यन्ते न तथेतरे ॥ १५३ ॥
पन्थाः सुदूरस्तत्रापि श्राद्धवासो न भूरिशः॥ वङ्गाद्विहर्तुं नान्यत्र
शक्यते संयतैस्ततः ॥ १५४ ॥ सत्यप्येवंविधे देश–स्वरूपेऽसौ त-
दास्मरत् ॥ शुभस्य शीघ्रमित्येतद्व–चनं विश्वविश्रुतम् ॥ १५५ ॥
चञ्चलं हि मनस्तस्या–ध्यवसायास्तथाविधाः ॥ को वा जानात्यना-
याते समये किं भविष्यति ॥१५६॥ शुभोऽस्त्यध्यवसायोऽयं तदिदा-
नीमनातुरः॥ क्रियोद्धारं करिष्येऽथा–पत्कल्पः शरणं मम ॥ १५७ ॥
आपत्कल्पालोचना य–त्सुलभास्मिन्भवे नृणाम् ॥ परं विशुद्धश्रा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रित्र–परिणामः सुदुर्लभः ॥ १५८ ॥ तन्नाद्यप्रभृति द्रव्यं प्रतिगृ-
ह्णामि नूतनम् ॥ यदस्ति पार्श्वे तत्त्याग–संकल्पं विदधामि च ॥१५९
इति मनसि विचिन्त्य प्राज्यसंवेगलाभात् विमलपरिणतिः श्रीमो-
हनः कर्महत्यै ॥ विधुतसकलकामः संभवेशस्य पार्श्वे व्यधित सपदि
दक्षः स क्रियोध्धारमेवम् ॥ १६० ॥ ॥ इति श्रीमत्पदवाक्यप्रमाणपारा-
वारीण–विद्वन्मुकुटालंकार–श्रीबालकृष्णभगवच्चरणारविन्दमिलिन्दायमा-
नान्तेवासिनः कानडोपाह्व–गोविन्दात्मज–दामोदरस्य कृतौ शाङ्के श्रीमोह-
नचरिते क्रियोद्धारकरणं नाम चतुर्थः सर्गः ॥ ४ ॥ ॥ ॥ ॥
॥ श्रीः ॥ नमः सिध्देभ्यः ॥ शंपासंपातसदृशं रामाणां रागमीक्ष्य यः॥
कुमार एव चारित्रं लेभे दद्याच्छ्रियं स वः ॥ १ ॥ विहर्तुकामा मुनयो

१ अस्य मालिनी वृत्तम् ।

For Private and Personal Use Only

मोहना मरुनीवृति॥ तत्र स्तोकमुषित्वाथ प्रातिष्ठन्त दिने शुभे ॥२॥
नदीयाने मुखगिरौ तथान्येषु पुरादिषु ॥ विहरन्तः क्रमात्तेऽथा–ज-
ग्मुर्वाराणसीपुरम् ॥ ३ ॥ संविग्नान्मोहनमुनीन् दृष्ट्वा वाराणसी-
स्थिताः ॥ श्राद्धाः संमदसंभाजोऽथ रागं पूर्वाधिकं दधुः ॥ ४ ॥ द्रव्यं
यद्विनियोक्तव्यं तत्रासीत्पूर्वकल्पितम् ॥ तत्रत्यान्दर्शयामासुः श्राद्धां-
स्तन्मोहनर्षयः ॥ ५ ॥ यथार्हमथ ते तस्य विनियोगं वितेनिरे ॥
स्थित्वा तत्र चतुर्मासीं मुनीन्द्रा जग्मुरग्रतः॥ ६ ॥ अथ ते मुनिशा-
र्दूलाः क्रमाद्भावस्त्ययोध्ययोः ॥ यात्रां विधाय विधिना ययुर्लक्ष्मण-
पत्तनं ॥ ७ ॥ चिरं निवसनाच्छ्राद्धा–स्तत्रत्या अतिसंस्तुताः ॥ संवि-
ग्नान्मोहनमुनी–न्यथाविधि ववन्दिरे ॥ ८ ॥ पूर्वसंकल्पितं वित्तं तै-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तत्रापि निवेदितम् ॥ आद्या जिनालयादौ त–द्योजयामासुरञ्जसा ॥ ९ ॥ इन्द्रप्रस्थप्रदेशेऽथ तथाग्राप्रान्त एव च ॥ विहरन्तो जयपुर–राष्ट्रं ते समवाप्नुवन् ॥ १० ॥ न दविष्ठे न नेदिष्ठे ग्रामादाराम एकदा ॥ विदधुर्वसतिं संध्या–मासन्नां वीक्ष्य मोहनाः ॥ ११ ॥ श्वापदानामरण्येषु सौलभ्यादर्धरात्रके ॥ शार्दूलः पुच्छमास्फाल्य गर्जन् संमुखमागमत् ॥१२॥ संनद्धेन सदा स्थेयं मुनिना मरणं प्रति ॥ धर्मध्यानं विधेयं चे–त्येवं तेऽस्मार्षुरागमम् ॥ १३ ॥ एगो मे सासउ अप्पा नाणदंसणसंजुउ ॥ सेसा मे बाहिरा भावा सव्वे संजोगलक्खणा ॥ १४ ॥ खामेमि सव्वजीवे सव्वे जीवा खमंतु मे ॥ मित्ती मे सव्वभूएसु वेरं मज्झ न केण इ ॥ १५ ॥ कायोत्सर्गं विधायैवं ध्याय-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्तस्ते चिदात्मनि ॥ तल्लीनतामवाप्याशु तत्यजुर्ममतां तनोः ॥१६॥
महानुभावान् दृष्ट्वा तान् शार्दूलोऽगात्पराङ्मुखः ॥ कः सर्वभूतसुहृदं

हन्तुं जगति शक्नुयात् ॥ १७ ॥ सद्धर्मो जयतीत्येवं वदन्तो मोहन-
र्षयः ॥ स्मृत्वा पञ्चनमस्कारं कायोत्सर्गमपारयन् ॥ १८ ॥ वियद्व-
ह्न्यङ्कधरणी-मिते विक्रमवत्सरे ॥ श्रीमोहनपदैः पूत-मभूज्जयपुरं
पुरम् ॥ १९ ॥ उव्यतो भावतश्चैव निर्ग्रन्था यतयोऽथ ते ॥ सर्व-
सावद्यविरता न्यवसंस्तत्र संमदात् ॥ २० ॥ अथासन्नतमं वर्षा-वासं
तत्र चिकीर्षवः ॥ श्रीमोहनर्षयोऽभूवं-स्तपःस्वाध्यायतत्पराः ॥२१॥
तापत्रितयसंतप्तान् भव्यान्धर्मपरायणान् ॥ देशनामृतवर्षिण्या गिरा ॥३८॥
ते निरवापयन् ॥ २२ ॥ अतिक्रान्तासु वर्षासु निर्यातायां शरद्यपि ॥

For Private and Personal Use Only

विजिहीर्षन्ति स्म तदा—जयमेरुपुरे वरे ॥ २३ ॥ संविग्नकल्पमाश्रित्य गुप्ताश्च समितास्तथा ॥ नव्यबोधं वितन्वन्तः पुरात्तस्मात्प्रतस्थिरे ॥२४॥ प्राप्ता अजयमेर्वाख्यं पत्तनं पत्तनोत्तमम् ॥ धर्मध्यानोचितायां ते वसतावक्सन्मुदा ॥ २५ ॥ मूर्ध्नारहितमात्मानं देशं च विहृतिक्ष-मम् ॥ विज्ञायाथ क्रियोद्धारं विधित्सन्ति स्म ते पुनः ॥ २६ ॥ क-लिकाताराजधान्यां सामान्येन पुरा कृतः ॥ स एव विधिनैतस्मिन् व्यधायि जिनसाक्षिकम् ॥ २७ ॥ महाव्रतधरास्तेऽथ संविग्ना मोहन-र्षयः ॥ छेदोपस्थापनं तत्र विधायाथ प्रतस्थिरे ॥ २८ ॥ विहारेणो-द्यतेनाथ विहरन्तः क्रमेण ते ॥ मरुदेशान्तर्गतायां पल्ल्यां पादाब्ज-मादधुः ॥ २९ ॥ श्रीमोहनपदद्वन्द्व—मभिवन्द्य पुनः पुनः ॥ तत्रत्याः

For Private and Personal Use Only

श्रावकाः प्रापु–र्मोदं वाचामगोचरम् ॥ ३० ॥ अथ ते मोहनमुख–
परिपूर्णेन्दुनिःसृतम् ॥देशनामृतमापीय तिरश्चक्रुर्दिवौकसः ॥ ३१ ॥
अत्यासन्ना वीक्ष्य वर्षाः पल्लीस्थाः श्रावकास्तु तान् ॥ अत्रैव वर्षा-
वसतिं कुरुतेति व्यजिज्ञपन् ॥ ३२ ॥ समीक्ष्य देशं कालं च श्राद्धा-
नप्यनुरागिणः ॥ श्रीमोहनमुनीन्द्रास्त–द्वचनं प्रतिपेदिरे ॥ ३३ ॥
तदङ्घ्रिपङ्कजालीना–न्नवत्पल्ली यदा तदा ॥ नामधेयमन्नूत्तस्या यो-
गरूढं सुविश्रुतम् ॥ ३४ ॥ षष्ठाष्टमाष्टाह्निकादि तपः कुर्वन् यथाब-
लम् ॥ पल्लीनिवासी श्रीसंघ–श्चतुर्मासीमयापयत् ॥ ३५ ॥ इन्द्रो
मुनीन्द्रात्को वान्यो गुरुः सद्गुरुतोऽपि वा ॥ देशनायाः सुधा कान्या
पल्लीत्थं स्वर्गतामगात् ॥ ३६ ॥ मोहोज्झिता अपाकुर्यु–र्मोहमत्र

किमद्भुतम् ॥ चित्रं यन्मोहनोऽप्येषां दृष्टिमोहमपाकरोत् ॥ ३७ ॥
शुभकर्मोदयाच्छ्राद्धा-स्तदा मोहनपादयोः ॥ शिरो निधाय भावेन
कर्माशुभमसूदयन् ॥ ३८ ॥ वर्धयन्तः पूर्वचितं तपः षष्ठाष्टमादिना ॥
बोधयन्तश्च भविका-न्मुदासन्मोहनर्षयः ॥ ३९ ॥ विक्रमार्काद्विंश-
शत-स्यैकत्रिंशे वितेनिरे ॥ पह्व्यां ते प्रथमां वर्षा-वसतिं मुनिवा-
सवाः ॥ ४० ॥ मार्गशीर्षेऽथ संप्राप्ते श्राद्धा विरहकातराः ॥ नाका-
मयन्त तान्मोक्तुं बद्धा रागेण भूयसा ॥ ४१ ॥ विहतौ सन्ति यावन्तो
गुणा जगति विश्रुताः ॥ चिरमेकत्र वसतौ दोषास्तावन्त एव हि
॥ ४२ ॥ इति निश्चित्य ते श्राद्धा निवासनपरा अपि ॥ प्रत्याख्याताः
शीघ्रमेतै-र्विजिहीर्षुभिरग्रतः ॥ ४३ ॥ प्रायो मरुप्रदेशेषु विहरन्तो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथारुचि ॥ चिरादवापुर्विश्रान्त्या अर्बुदेशपुरं प्रति ॥ ४४ ॥ राज-
पुत्रान्ववायेन राज्ञा तत्प्रतिपालितम् ॥ पुरं शिरोहीति नाम्ना सांप्रतं
प्रथितं भुवि ॥४५॥ मरोर्भागद्वये योऽल्प-मरुरित्यभिधीयते ॥ तत्र
प्रधानं नगर-मेतदेव वदन्ति हि ॥ ४६ ॥ तत्र प्रसन्नमनसो-ऽवसं-
स्ते मुनिसत्तमाः ॥ धर्मध्यानं यत्र भवे-त्स देशो मुनिसंमतः॥४७॥
तत्रापि देशनास्वाति-पयः श्रावकचातकाः ॥ निपीय विजहुस्तृष्णां
तृष्णा हि भववर्धिनी ॥ ४८ ॥ बालं मध्यं बुधं चैव देशकालानुसा-
रतः ॥ तत्तदर्होपदेशेन बोधयन्ति स्म ते सदा ॥ ४९ ॥ यत्र यस्य
भवेद्धर्मे-ऽभिनिवेशश्चतुर्विधे ॥ तत्र तस्यारुचिर्न स्या-त्तथा ते त-
त्वमूचिरे ॥ ५० ॥ आर्द्राप्रवेशोऽत्यासन्ने श्राद्धानामुपरोधतः ॥ तत्रैव



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेषामन्नव–द्वर्षावासविनिश्चयः ॥ ५१ ॥ तदा लाभ्नाङ्ददाराणां सद्गु-
रूणां मनीषिणाम् ॥ वितेनुर्विविधं श्राद्धा–स्तत्रत्या उत्सवं मुदा
॥ ५२ ॥ देशनामृतमा तृप्तेः पिबन्तः श्रावकोत्तमाः ॥ मरुदेशान्तर्गतं
त–न्मेनिरेऽनूपसंनिभम् ॥ ५३ ॥ कुन्देन्दुधवलं तेषां यशः प्रसरदे-
कदा ॥ तत्पुराधीशनृपतेः कर्णगोचरतामगात् ॥ ५४ ॥ श्रुत्वा चम-
त्कारगर्भं तेषां चरितमादरात् ॥ सोऽभूत्तद्दर्शने सद्यो भृशमुत्सुक-
मानसः ॥ ५५ ॥ निर्णीतपूर्वे समये समागत्य स भूपतिः ॥ श्रीमो-
हनपदद्वन्द्व–मकरोदक्षिगोचरम् ॥ ५६ ॥ माध्यस्थ्यमवलम्ब्याथ
तेषां बोधं वितन्वताम् ॥ वचोऽवञ्चकमाकर्ण्य भद्रभावमगादसौ ॥ ५७ ॥
शासनोन्नतिमेतां ते विलोक्य श्रावकास्ततः ॥ मोहनाङ्घ्रियुगे रागं

For Private and Personal Use Only

विदधुः पूर्वतोऽधिकम् ॥ ५८ ॥ धर्मोद्द्योतं वितन्वन्त एवं ते मुनिपु-
ङ्गवाः ॥ निन्युर्यथासुखं तत्र वर्षामासचतुष्टयीम् ॥ ५९॥ नयनानल-[1932]
नन्देन्दु—मिते विक्रमवत्सरे ॥ चतुर्मासी द्वितीयान्नू—त्सादडीपत्तने
शुभे ॥ ६० ॥ अथो विहारयोग्येषु संजातेषु च वर्त्मसु ॥ विजृम्भ-
माणे हेमन्ते विहरन्ति स्म ते द्रुतम् ॥ ६१ ॥ विहारक्रमयोगेन पुन-
रागत्य सत्वरम् ॥ पुरमेतन्निजपदैः सनाथीक्रियतां किल ॥ ६२ ॥
एवमभ्यर्थमानांस्ते श्रावकान्विनयानतान् ॥ आगमोक्तेन विधिना
बोधयन्तोऽग्रतो ययुः ॥ ६३ ॥ एकद्वित्रिचतुःपञ्च—प्रयाणानि सहा-
ययुः ॥ अर्बुदेशपुरीवासि—श्राद्धास्तेष्वनुरागिणः ॥ ६४ ॥ अथ
श्रीमोहनमुनि—विकसन्मुखपङ्कजम् ॥ विलोक्येव वनान्तःस्थं म-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

म्लावम्भोजमण्डलम् ॥ ६५ ॥ माभूद्विहरतामेषां बाधा कापि मदा-
तपात् ॥ इतीवालोच्योष्णरश्मि–र्नात्युष्णकिरणोऽभवत् ॥ ६६ ॥
विहरत्स्वेषु मुनिषु ऋतुस्तापोपशान्तितः ॥ शैत्यं समागात्तेनास्मिन्
शीतं प्रसरति क्षितौ ॥ ६७ ॥ मरौ च मेदःपाटे च विहरन्तो यथा-
गमम् ॥ मार्गागतानि तीर्थानि नमन्तश्च यथाविधि ॥ ६८ ॥ यथा-
पात्रं वितन्वन्तो धर्मबोधमथान्यदा ॥ श्रीमोहनमुनीन्द्रास्ते पल्ली-
प्रान्तं समासदन् ॥ ६९ ॥ तदुपश्रुत्य पल्लीस्थाः श्राद्धा निर्वृतमा-
नसाः ॥ सहसागत्य विनता मोहनाङ्घ्री ववन्दिरे ॥ ७० ॥ अवदंश्च
पुनः पूज्यैः पल्ल्यां कृत्वा पदं निजम् ॥ पावनीयाश्चिराद्भीम–दर्शनो-
त्कण्ठिता वयम् ॥ ७१ ॥ विज्ञप्तिमुररीकृत्य पल्लीमागत्य तैः सह ॥

For Private and Personal Use Only

धर्मं विवर्धयन्तस्ते न्यवसन्वसतौ सुखम् ॥ ७२ ॥ कामं ववर्ष वर्षासु
यथा सर्वत्र वारिदः ॥ देशनाम्बु तथैवायं मोहनाब्दोऽपि लीलया
॥ ७३ ॥ वृष्टेर्यथा कालिकायाः क्षेत्रमङ्कुरवद्भवेत् ॥ तथा धर्माङ्कुरं
तस्याः केचिन्मनसि दध्रिरे ॥ ७४ ॥ तपस्यन्तमवेक्ष्यैक–मन्यो न-
व्योऽपि भावतः ॥ तपस्यामातनोद्धर्मा–द्धर्मोऽप्येवं प्रवर्धते ॥ ७५ ॥
विक्रमाब्दे[१९३३] ह्यग्निनन्द–भूमिते परिवत्सरे ॥ वर्षावासस्तृतीयोऽभू–
त्पल्ल्यां धर्मप्रवर्धकः ॥७६॥ अथ वृश्चिकगे सूर्ये समयं विहृतिक्रमम्॥
विलोक्य शोभने लग्ने व्यहार्षुर्मोहनर्षयः ॥ ७७ ॥ वन्दमाना धर्म-
लाभं सास्त्रा बोधप्रदां गिरम् ॥ तथा योगं वर्तमानं पुनरागमनेच्छवः
॥ ७८॥ विविधं च तथा प्रत्या–ख्यानं धर्मक्रियारताः ॥ तदैवमुचितं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेभ्यः श्राद्धा लाभमवाप्नुवन् ॥७९॥ युग्मम्॥ क्वचिदाहारपानीयं क्व-
चिद्वसतिमेव वा ॥ क्वचित्तद्भजनयं चापि कुर्वाणास्ते यथाश्रुतम् ॥८०॥
एकरात्रं द्विरात्रं वा त्रिरात्रं वा ततोऽधिकम् ॥ ग्रामादिषु वसन्तश्च
देशकालाद्यपेक्षया ॥८१॥ विहृत्य धन्वसु चिरं समवापुः क्रमेण ते ॥
पुरं यत्सादडीनाम्ना प्रथितं सांप्रतं भुवि ॥८२॥ विशेषकम् ॥ संघ-
स्तत्रत्योऽप्ययाव–त्पपौ तेषां यशःसुधाम् ॥ अद्य भाग्योदयाल्लेभे
दुर्लभं देशनामृतम् ॥ ८३ ॥ अथामोदमनिर्वाच्यं तत्रस्था भेजिरे
जनाः ॥ यत्तत्र वर्षावसतिं मुनीन्द्रास्ते प्रपेदिरे ॥ ८४ ॥ अङ्गप्रविष्टं
वा किंचि–दुपाङ्गमपि किंचन ॥ प्राक्पौरुष्यास्ततो विद्व–त्प्रणीतं च-
रितादिकम् ॥ ८५ ॥ धर्मव्याख्यानमेवं ते गिरा मधुरयान्वहम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





श्रावयन्तः कस्य चित्तं धर्मरक्तं न चक्रिरे ॥ ८६ ॥ युग्मम् ॥ समन्ततो ये न्यवसन्नश्राद्धाः सरलबुद्धयः ॥ ते पर्युषणवेलाया-मागतास्तत्र सत्वरम् ॥ ८७ ॥ उत्साहवन्तः सर्वेऽतो-ऽभवत्तत्रोत्सवो महान् ॥ तथा तपोऽपि विविधं चक्रे संहननान्वितैः ॥ ८८ ॥ चातुर्मास्यन्नवे जाते प्रतिक्रमणकर्मणि ॥ धर्मक्रियासु पूर्णासु निर्विघ्नं निखिलासु च ॥ ८९ ॥ विजिहीर्षा मुनीन्द्राणां नैराश्यमनुरागिणाम् ॥ विमलत्वं वर्त्मनां च समकालमभूत्तदा ॥ ९० ॥ युग्मम् ॥ विक्रमादब्धिवह्न्येकचन्द्र-जगतीमितवत्सरे ॥ वर्षावासं तुरीयं ते विदधुः सादडीपुरे ॥ ९१ ॥ यथापूर्वं विहृत्याथ चिरात्ते मोहनर्षयः ॥ महन्मरुषु विख्यातं ययुर्योधपुरं वरम् ॥ ९२ ॥ श्रीसंघस्तन्निवास्यासी-त्पूर्वतो-



For Private and Personal Use Only

ऽप्येषु रागवान् ॥ संविग्नानवलोक्यैनां–स्तदैवं सोऽन्वमन्यत ॥९३॥
जात्यं सुवर्णं रत्नेन प्रत्युप्तं राजतेऽधिकम् ॥ मुनिस्वर्णं तथैवेदं रत्न-
चारित्रयोगतः ॥ ९४ ॥ अपि भूषितसर्वाङ्गं सुन्दरं महिलावपुः ॥
तिलकेनैव लसति मुनिरत्नं व्रतेन वा ॥ ९५ ॥ तारकोपेतमथवा शार-
त्कालिकमम्बरम् ॥ राजते रजनीशेन मुनिरत्नमिदं तथा ॥ ९६ ॥
एवं दृढानुरागेण बद्धास्ते श्रावकोत्तमाः ॥ मुञ्चेयुः किं मुनीन्द्रांस्ता–
न्वर्षातिक्रमणं विना ॥ ९७ ॥ तपःशस्त्रैः कर्मशत्रुः पराजिग्य इहैव
यैः ॥ त एव योधास्तेषां च वासाद्योधपुरं विदुः ॥ ९८ ॥ एतादृशे
पुरे श्रीम–न्मोहनाङ्घ्रिसरोरुहम् ॥ रराज तत्र कियती वक्तव्या शा-
सनोन्नतिः ॥ ९९ ॥ भूतपूर्वे चतुर्मासी–चतुष्के या पुराऽभवत् ॥ एत-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्यामधिका तस्मा–द्धर्मोन्नतिरभूत्तदा ॥ १०० ॥ पर्व पर्युषणं पूतं त-
पस्या विविधापि च ॥ उत्सवादि तदा सर्वं निर्विघ्नं निरवर्तत ॥१०१॥
यतिर्व्रताग्निनन्दोर्वी[१९३५]–मितेऽब्दे मोहनर्षयः ॥ वर्षावासं पञ्चमं ते च-
क्रुर्योधपुरे वरे ॥ १०२ ॥ [1]मार्गोऽयं विमलो व्यधायि न किमप्यत्रास्ति
दोषोऽधुना दीनेऽह्नाय दयां विधाय चरणस्पर्शोऽद्य मे दीयताम् ॥
मार्गाख्याविधृतेरितीव मनसो भावं स्फुटं कुर्वति मासे ते विदधुर्वि-
हारममलस्वान्तैर्जनैः संस्तुताः ॥ १०३ ॥ इति श्रीमत्पदवाक्यप्रमाण-
पारावारीण–विद्वन्मुकुटालंकार–श्रीबालकृष्णभगवच्चरणारविन्दमिलिन्दा–
यमानान्तेवासिनः कानडोपाह्व–गोविन्दात्मज–दामोदरस्य कृतौ शाङ्के
मोहनचरिते प्रथमादि–पञ्चमावधि–चातुर्मास्यवर्णनं नाम पञ्चमः सर्गः ५

१ शार्दूलविक्रीडितं छन्दः ।



For Private and Personal Use Only

॥ श्रीः ॥ नमः सिद्धेभ्यः ॥ शङ्खलक्ष्मा शिवायास्तु यदुवंशाब्धिचन्द्रमाः ॥ यो न रेमेऽन्यरामाभि–र्मुक्तिरामारतोत्सुकः ॥ १ ॥ विहरन्तो मुनीन्द्रास्ते–ऽजयमेरुपुरं ययुः ॥ प्रायः प्रमाणं विहृतौ यद्वृत्ता संयतात्मनाम् ॥ २ ॥ यत्रोपरोधः श्राद्धानां विशेषात्परिदृश्यते ॥ तत्रैव वर्षावसतिं नूनं कुर्वन्ति संयताः ॥ ३ ॥ क्रियोद्धारो यत्र चक्रे तत्र वर्षा वसाम्यहम् ॥ ईदृशी मोहनमुनि–वाञ्छाभूत्सफला तदा ॥ ४ ॥ प्रायः शुभतरं यस्य कर्म स्यादुदयोन्मुखम् ॥ तस्य धर्मक्रियायां स्या–दन्तरायः कुतोऽपि किम् ॥५॥ ओजस्कत्वं वचसि सावद्यं हृदये तथा ॥ यत्र नेदं द्वयं तत्र जनः किं नानुरज्यति ॥ ६ ॥ धर्मात्पराङ्मुखा आस–न्ये जनास्तेऽपि तत्पराः ॥ धर्मक्रियायामभवन्

मो० मुनिराजप्रभावतः ॥ ७ ॥ धर्मवृद्धिः पापहानिः प्रसत्तिरपि चेतसः ॥ स० ६
समाप्तिश्च चतुर्मास्याः सुखमेवाभवत्तदा ॥ ८ ॥ सुवर्णं पार्थिवं मेरा–
॥४५॥ वतो जय्यः स कीर्त्यते ॥ धर्मस्वर्णं यतोऽत्रेद–मजयाद्यभिधं पुरम्
॥ ९ ॥ गुहास्य[१९३६]वह्निनन्दोर्वी–मितेऽब्दे धर्मतत्पराः ॥ षष्ठं चातुर्मास्य-
मेते–ऽजयमेरुपुरेऽवसन् ॥ १० ॥ अथ तेऽवसरे प्राप्ते वितेनुर्विहृतिं
लघु ॥ विहारेऽप्रतिबन्धे हि साधूनामुत्सवो महान् ॥११॥ विहरन्तो
यथाकामं संयतास्ते समाययुः ॥ क्रमाद्योधपुरप्रान्तं गन्तुं तत्र समु-
त्सुकाः ॥ १२ ॥ तेषां प्रविशतां योध–पुरं दक्षिणमीक्षणम् ॥ तथा-
पसव्यो बाहुश्च पस्पन्दे शोभनं हि तत् ॥ १३ ॥ पूर्णकुम्भधरा नारी ॥४५॥
संमुखं समुपागता ॥ चेरुः शकुन्ता मधुरं कूजन्तः पार्श्वयोस्तथा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ १४ ॥ शोभनाञ्शकुनान्दृष्ट्वा दध्युरेवं मुनीश्वराः ॥ प्रतिबोधं कोऽ-
पि भव्यो मत्तो लब्धेति निश्चितम् ॥ १५ ॥ अथ ते संमुखायातैः
श्राद्धैः सास्त्रैः समानतैः ॥ संमानिताः समागत्य वसतावावसन्सुखम्
॥ १६ ॥ अलंचन्द्रो नाम तत्र भव्य एकः समागमत् ॥ देशनामपि
शुश्राव श्रीमोहनमुखोद्भवाम् ॥ १७ ॥ आसन्नोदयमेनं ते ज्ञात्वा स-
द्गुरवोऽपि हि ॥ तथोपदिदिशुर्धर्मं यथासौ प्रत्यबुध्यत ॥ १८ ॥
चारित्रमोहनीयस्य क्षयोपशमतः स तु ॥ महाव्रतानि मे दत्ते-त्येवं
व्यज्ञपयद्गुरून् ॥१९॥ वीक्ष्यायतिं तेऽलंचन्द्र-विज्ञप्तिं प्रतिपेदिरे ॥
१९३७
मुहूर्तोऽप्यासन्न आसी-त्तदा दैववशाच्छुभः ॥ २० ॥ मुन्यग्निनन्दधर-
णी-मितेऽब्दे वैक्रमे शुभे ॥ शुचौ सिते दशम्यां चा-लंचन्द्रो व्रत-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





माददे ॥ २१ ॥ सद्गुरूणां पादनख–मण्डले सति सुन्दरे ॥ अलं
चन्द्रेणेति वदं–स्तन्नामायमनूत्किल ॥ २२ ॥ नवदीक्षितशिष्येण
सहिता मोहनर्षयः ॥ वितत्य विहृतिं प्रापुः पल्लीं पल्लीनसज्जनाम्
॥ २३ ॥ ज्ञातमेव तदा तस्या–मविन्दञ्श्राद्धसत्तमाः ॥ अनुत्तर-
विमानस्था यथा त्रिदिवनायकाः ॥ २४ ॥ पल्लीस्थानां महद्भाग्यं
यदेते मुनिसत्तमाः ॥ वर्षावासमिमं तत्र विधातुमनुमेनिरे ॥ २५ ॥
स्थानाङ्गं श्रावयामासुः श्राद्धांस्तेन विवेकिनः ॥ ज्ञानादृतेः क्वयं
चोप–शमं केचिदवाप्नुवन् ॥ २६ ॥ श्रीमन्मोहनपादाब्जे–ऽवनताः
श्रावकर्षभाः ॥ आत्मानमुन्नतं चक्रु–र्नमनाडुन्नतिर्वरा ॥२७॥ जलै-
(डै-)र्मलिनसंसर्गा–द्धने वर्षास्वधोगतिः ॥ नव्यैस्तु साधुसत्संगा–



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्तदोर्ध्वगतिराप्यत ॥ २८ ॥ विज्ञायते नैव कालो यथा विषयसं-
गिभिः ॥ निर्यातापि चतुर्मासी तथा नाज्ञायि धर्मिभिः ॥ २९ ॥ मु-
निमोहनगीरेवा—मूलमन्त्रं हि कार्मणं ॥ यतस्तां शृणुते यः स य-
थोक्तं प्रतिपद्यते ॥ ३० ॥ श्रीमोहनेन गोपेन नीता आगमशाड्वले ॥
गावः पल्ल्यां लसन्ति स्म सार्यां साभूत्तदा किल ॥ ३१ ॥ विमला वि-
रतौ वृष्टे—रजायन्त जला—(डा-)शयाः ॥ प्रायो नैव परोत्कर्षं सहन्ते
दुर्ग्रहा जडाः ॥ ३२ ॥ दक्षिणाध्वचरस्यापि मम किं किरणावलिम् ॥
मलीमसो रुणद्ध्येष जलवाहो जडान्तरः ॥ ३३ ॥ इतीव रोषादा-
दित्य—स्तताप निखिलैः करैः ॥ पाटच्चरा इव तदा मेघा जग्मुर्दिशो
दश ॥ ३४ ॥ पूताब्जविकररूपर्शा—न्मलिना अपि नीरदाः ॥ मालि-

For Private and Personal Use Only

न्यमपनिन्युः स्वं जाड्यं चाभ्यन्तरस्थितम् ॥३५॥ तेजस्तिग्मं वीक्ष्य
पद्म–बन्धोर्विकसिताब्जवत् ॥ पद्मिनी तत्परिमलः प्रथते स्म सम-
न्ततः ॥ ३६ ॥ अत्यन्तमत्ययं वीक्ष्य मेघानामपि भास्करः ॥ कवो-
ष्णान्किरणाश्चक्रे कोपो हि क्षणिकः सताम् ॥ ३७ ॥ प्रक्षीणे बाह्य-
तापेऽपि मनस्तापो व्यवर्धत ॥ पल्लीस्थानां यतः शीघ्रं विजह्रुर्मोह-
नर्षयः ॥ ३८ ॥ गिरिवह्न्यङ्कभूमाने वत्सरे मोहनर्षयः ॥ न्यवसन्स-
प्तमीं पल्ल्यां चतुर्मासीं यथासुखम् ॥ ३९ ॥ अथ नागपुरं प्रापु–र्वि-
हारेणोद्यतेन ते ॥ विनासक्तिं विहरतां किं दूरे किमु वान्तिके ॥४०॥
दृढानुरागिणां तत्र श्राद्धानामुपरोधतः ॥ स्थित्वा स्तोकं पुरश्चेलु–
र्विकानेरपुरं प्रति ॥४१॥ तत्प्रदेशेऽथ पर्याप्तं विहृत्यैते यथासुखम् ॥

॥४७॥

क्रमाद्योधपुरप्रान्त-माययुर्विमलाशयाः ॥ ४२ ॥ श्रुत्वा योधपुरावा-
स-श्रावका मोहनागमम् ॥ समेत्य सद्गुरून्नन्तुं निर्जग्मुरविलम्बि-
तम् ॥ ४३ ॥ अलंचन्द्रस्य दीक्षाव-सरेऽस्माभिः कृतार्थना ॥ मो-
घाभवद्भाग्यान्नः सा भूयात्सफलाधुना ॥ ४४ ॥ हीनेऽस्मिन्समये
प्रायो-ऽस्मादृशां गुरुकर्मणाम् ॥ युष्मादृशां सद्गुरूणां योगो भाग्यै-
र्विना कुतः ॥ ४५ ॥ कृपां कृत्वा तदस्माकं पूरणीया मनोरथाः ॥ सं-
सृतौ सीदतां शीघ्र-मुद्धारो हि सतां व्रतम् ॥ ४६ ॥ निपीड्य चर-
णावेवं प्रार्थयन्तो मुहुर्मुहुः ॥ उमित्युत्तरमापुस्ते सत्सु नाभ्यर्थना
वृथा ॥ ४७ ॥ गीतवादित्रपूर्वं ते श्रावकैः परया मुदा ॥ प्रवेशिता
नतेभ्योऽङ्ग-धर्मलाभं मुनीश्वराः ॥ ४८ ॥ मरावल्पा मेघवृष्टिः कल-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ङ्कमिममस्य ते ॥ निराकर्तुमिवानल्पं ववृषुर्देशनापयः ॥ ४९ ॥ ऊषरं
क्षेत्रमन्नव—त्क्षेत्रं बीजसमन्वितम् ॥ बीजमाप्नोदङ्कुरता—मङ्कुरः क्षुप-
॥४८॥ तामगात् ॥ ५०॥ क्षुपो विटपितामाप विटपी कुसुमोद्गमम् ॥ कुसुमा-
न्यन्नवञ्शीघ्रं फलदानोन्मुखानि च ॥ ५१ ॥ मिथ्यात्वमूषरं प्रोक्तं
क्षेत्रं नद्रकता तथा ॥ सम्यक्त्वं बीजमित्याहु—रङ्कुरोऽणुव्रतानि च
॥ ५२ ॥ क्षुपः स्यात्सर्वविरति—र्विटपी क्षायिकं व्रतम् ॥ देवलोकस्तु
कुसुमं फलं निर्वाणमुच्यते ॥ ५३ ॥ अब्दवृष्टिस्तु सुक्षेत्र—मात्रे फ-
लवती परम् ॥ यथापात्रमनूदेवं सफला धर्मदेशना ॥ ५४ ॥ तापेऽ-
रतिप्रदेऽर्कस्य शान्तेऽथ न्नविका जनाः ॥ तपो विविधमातेनुः शोधनं ॥४८॥
हि तपः परम् ॥ ५५ ॥ शीतेन तापशान्तिर्हि विदिता नुवनेऽखिले ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तपस्तापात्कर्मतापो–च्छेदश्चित्रकरः परम् ॥ ५६ ॥ वृत्ते पर्युषणापर्व–
ण्यनूत्तत्रोत्सवो महान् ॥ उत्साहशक्तिर्यत्रास्ति तत्रानारतमुत्सवः
॥ ५७ ॥ विक्रमादिभ[१९३८]वह्न्यङ्क–भूमिते वत्सरे शुभे ॥ चतुर्मास्यष्टमी
तेषां पुरे योधपुरेऽभवत् ॥ ५८ ॥ मेदःपाटादिदेशेषु विहरन्तो यथा-
गमम् ॥ शिरोहीनगरं प्रापुः संयता मोहनर्षयः ॥ ५९ ॥ [१९३९]नन्दाग्निन-
न्दभूमाने वत्सरे वैक्रमेऽथ ते ॥ नवमीं न्यवसंस्तत्र चतुर्मासीं यथा-
सुखम् ॥ ६० ॥ ततोऽवसरमासाद्य विजहुर्मुनिसत्तमाः ॥ प्रायः सन्तो
नावसरं विफलीकुर्वते किल ॥ ६१ ॥ विहरन्तः संयतास्ते–ऽजयमे
रुपुरं ययुः ॥ ततश्च नगरे नूत्न–नगराख्येऽतिविश्रुते ॥ ६२ ॥ शुभै-
र्निमित्तैः कथित–शुभायतिरनाकुलः ॥ तत्रैकः श्रावकोऽभ्यागा–ज्ज्ये-

For Private and Personal Use Only

ष्ठो नाम्ना गुणैरपि ॥६३॥ आसन्नोदयमैक्ष्यास्य चारित्रं मोहनर्षयः ॥
प्रतिबोधार्थमित्येव–मूचुः समयकोविदाः ॥ ६४ ॥ ज्येष्ठ त्वमिह सं-
सारे ज्येष्ठं धर्मं समाश्रय ॥ नहि तेन विना किंचि–त्सारं जगति वि-
द्यते ॥ ६५ ॥ रसमिक्षोः समादाय कूर्चकस्त्यज्यते यथा ॥ देहाद्धर्मं
तथादाया–सारमेनं समुत्सृजेत् ॥ ६६ ॥ शाताशातं कर्मफलं जीवो
वेदयते हि यत् ॥ तत्राल्पं प्रायशः शातं तदपीह न शाश्वतम् ॥६७॥
उदर्को दारुणोऽत्यन्तं विषयाणामवेक्ष्यते ॥ तथापि मूर्छया तत्र सुखं
जीवोऽभिमन्यते ॥ ६८ ॥ तस्माद्वैषयिकं हित्वा सुखाभासं विवेकतः ॥
चारित्रं प्रतिपद्येत जन्म तस्य प्रशस्यते ॥ ६९ ॥ विवेक एव जीवानां
दुर्लभो मानवे भवे ॥ तद्बलादेव निखिला दोषा नश्यन्ति तद्यथा

॥ ७० ॥ अस्त्यस्मिन्नेव भरते श्रीपुरं श्रीविराजितम् ॥ श्रीषेणो नाम तत्रासी-न्मतिमान्नीतिमान्नृपः ॥ ७१ ॥ पुरोहितस्तस्य सोम-शर्मा वंशक्रमागतः ॥ राजप्रसादादभव-त्पात्रं निःशेषशर्मणाम् ॥ ७२ ॥ परं पुत्रमुखं नासा-वपश्यद्दैवदोषतः ॥ वार्धक्यमासन्नमभू-द्भयक्का-राणां यदालयः ॥ ७३ ॥ एकदा तं नृपः प्रोचे तवेयमनपत्यता ॥ यथा मां बाधते न त्वां तथात्र किमु कारणम् ॥ ७४ ॥ निर्व्यूढोऽभू-दियत्काल-मावयोरन्वयक्रमः ॥ अतः परं को भविता मत्सुतस्य पुरोहितः ॥ ७५ ॥ कुलीनो यद्यसौ नैव लभ्येतादृष्टदोषतः ॥ को नाम तत्र विश्वास एषा चिन्ता कथं न ते ॥ ७६ ॥ सोमोऽवदच्चिन्तयात्र किं दैवायत्तवस्तुनि ॥ भुनक्ति स्वकृतं जीवो नादत्तमुपतिष्ठते ॥ ७७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





आत्मायत्ते गुणाधाने नैर्गुण्यं वचनीयता ॥ दैवायत्ते पुनः कार्ये पुंसः का नाम वाच्यता ॥ ७८ ॥ राजावोचदुपायोऽस्ति दैवं येन भवेद्गुरु ॥ विधाय साहसं देवी–माराधय कुलागताम् ॥ ७९ ॥ धर्माय पूज्यते वीत–रागोऽन्ये विघ्नशान्तये ॥ ते तां यदि न कुर्वीरं–स्तत्पूजा किंफला वद ॥ ८० ॥ एवं राज्ञेरितः सोमो देवीभवनमागमत् ॥ दर्भसंस्तारके तस्याः पुरः स समुपाविशत् ॥ ८१ ॥ पुत्रदानाभिवचनं यदा देवि प्रदास्यसि ॥ तदा भोक्तास्म्यहं नो चे–न्नेत्यभिग्रहमग्रहीत् ॥ ८२ ॥ तृतीयेऽहनि सा देवी क्षुब्धा सोमस्य संततिम् ॥ अपश्यन्त्यागत्य सिद्ध–यक्षमेवमवोचत ॥ ८३ ॥ कष्टं भो वर्तते कुर्वे किमद्य यदयं द्विजः ॥ पुत्रं मां याचतेऽदृष्टे सोऽस्य नैवोपलभ्यते ॥ ८४ ॥ श्रु-



For Private and Personal Use Only

त्वैतदूचे यत्तोऽसौ मुग्धे सुकरमुत्तरम् ॥ तं ब्रूहि विप्रं यदहो तव पु-
त्रोऽस्ति किंत्वसौ ॥८५॥ पारदार्यरतो द्यूत-करश्चौरश्च निश्चितम् ॥
दोषाणामपराणां च निधानं स भविष्यति ॥ ८६ ॥ युग्मम् ॥ एकैक-
मप्यनर्थाय पारदार्यादि सेवितम् ॥ यस्मिंस्त्रयमिदं तेन किं पुत्रेण
करिष्यति ॥ ८७ ॥ प्रहृष्टा सागमद्यत्त-प्रोक्तमूचे पुरोधसम् ॥ सोऽपि
गत्वा नृपाभ्यर्णे देवीवचनमब्रवीत् ॥ ८८ ॥ विमृश्य नृपतिः प्रोचे का
हानिः सोम याच्यताम् ॥ यदीदृशोऽप्यस्तु पुत्रः किं तु देवि विवेक-
वान् ॥ ८९ ॥ आदाय शिक्षां तां गत्वा द्विजो देवीमयाचत ॥ प्र-
तिपन्नं तयाप्येत-त्ततोऽसौ स्वगृहं गतः ॥ ९० ॥ अथ तस्यास्ति
गणिका काचिद्विश्रम्भभाजनम् ॥ तावन्त्यहानि साप्यस्था-द्भूस्वापा

त्यक्तभोजना ॥ ए१ ॥ चेट्या निवेद्य सपदि तत्स्वरूपं बलादपि ॥
तद्गृहेऽनायि तत्रासौ स्नातभुक्तोऽवसन्निशाम् ॥ ए२ ॥ प्रातः स्वगृ-
हमागच्छ-न्दध्यावेवमसौ द्विजः ॥ धिग्मां जायां सुकुलजा-मुपेक्ष्यात्र
स्थितं शठम् ॥ ए३ ॥ लब्ध्वा प्रसादं देव्या य-दत्रैवावसमुन्मनाः ॥
कुक्षेत्रजस्तत्पुत्रो मे भावी नूनं न चान्यथा ॥ ए४ ॥ अन्तर्विषीदन्त-
मिछं नृपः प्राह पुरोधसम् ॥ हर्षस्थाने किमेवं भोः शुचाक्रान्तोऽसि
तद्वद ॥ ए५ ॥ किं विप्रलब्धो देव्या वा मन्तुं कंचित्समाचरः ॥ ततो
यथायथं सर्व-माख्यन्नृपं पुरोहितः ॥ ए६ ॥ राज्ञोचे मा कृथाः खेद-
मेतादृशि कुले यतः ॥ भवन्ति देवतादिष्टा-स्तादृशास्तव का क्षतिः
॥ ए७ ॥ परं तावदसौ नैव प्रकाश्यो यत्नतस्त्वया ॥ विवेकरविराविर्न



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यावद्दोषतमोहरः ॥ ९८ ॥ राजादेशसुधां पीत्वा सोमः स्वगृहमागमत् ॥ प्रच्छन्नां तां कारयित्वा ररक्षावहितो भृशम् ॥ ९९ ॥ समयेऽसूत सा सूनुं ततो राजानुशासनात् ॥ निभृतं कृतसंस्कारः सोमेनासौ व्यवर्धत ॥ १०० ॥ ततोऽध्ययनयोग्यं तं विज्ञायासौ विचक्षणः ॥ स्वयमेवाध्यापयितु–मारेभे जनकः सुतम् ॥ १०१ ॥ सुरङ्गान्तस्थितस्यास्यो–परिष्टुफलकासनः ॥ छात्राणां पुरतः शास्त्रं बहिरध्यापयत्यसौ ॥ १०२ ॥ सूत्रं बध्वा निजाङ्गुष्ठे तदग्रं सूनवे ददौ ॥ संदेहेऽदश्चानीयमिति संकेतपूर्वकम् ॥ १०३ ॥ प्रज्ञाशाली सूनुरसौ जानाति स्तोकतो बहु ॥ प्रस्तावात्पठितं पद्य–मेतदागमदन्यदा ॥ १०४ ॥ दानं भोगश्च नाशश्च वित्तस्येदं गतित्रयम् ॥ न दत्तं नापि भुक्तं त–

For Private and Personal Use Only

तृतीयां गतिमाप्नुयात् ॥ १०५ ॥ व्याख्यां श्रुत्वास्य कुरुते सुतः संदेहसूचनम् ॥ सोमदत्तोऽवबोधार्थं पुनर्व्याख्याति पूर्ववत् ॥ १०६ ॥ व्याख्याते द्विस्त्रिरप्येष सूत्रं चालयते पुनः ॥ सोमदत्तस्तदा रोषात्सर्वाङ्गात्राण्यसर्जयत् ॥ १०७ ॥ बहिराकृष्य तनय-मेवं स विजनेऽब्रवीत् ॥ रे मूढ सागरं तीर्त्वा कथं मज्जसि गोष्पदे ॥ १०८ ॥ गहनान्यपि शास्त्राणि लीलया गाहते स्म या ॥ उत्तानार्थे वचस्यस्मिन् सा मूढा त्वन्मतिः कथम् ॥ १०९ ॥ सुतोऽवददहो तात यद्वित्तस्य गतित्रयम् ॥ व्याख्यातं भवता तन्न प्रतिभात्युचितं मम ॥ ११० ॥ ( यतः ) आयासशतलब्धस्य प्राणेभ्योऽपि गरीयसः ॥ गतिरेकैव वित्तस्य दानमन्या विपत्तयः ॥ १११ ॥ सर्वोत्तमं तत्पात्रे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्या–दयाख्यं पुनरर्हते ॥ वनीपके यशस्यं च बन्धुषु प्रेमवर्धनम् ॥ ११२ ॥ विघ्ननाशाय भूतादौ वैरनाशाय वैरिषु ॥ एवमौचित्येन दत्तं दानं न क्वापि निष्फलम् ॥ ११३ ॥ भोगे तु क्षणिकं सौख्य–मैहिकं केवलं भवेत् ॥ इहामुत्र विनाशाय नाशस्तस्येति निश्चितम् ॥ ११४ ॥ आकर्ण्य तनयस्येत्थं विवेकविशदं वचः ॥ पुरोहितः प्रहृष्टात्मा गत्वा राज्ञे न्यवेदयत् ॥ ११५ ॥ राजाह साधु साध्वेष विवेकार्कः समुद्गतः ॥ आवयोर्दुःखतमसां जालं ह्यागपनोत्स्यति ॥ ११६ ॥ तदारोप्य गजेन्द्रं तं त्वरया त्वमिहानय ॥ यथा नामास्य सुमति–रित्यस्तु स्वगुणार्जितम् ॥ ११७ ॥ एवमादिश्य नृपतिः प्रेषयामास हस्तिनम् ॥ सोमोऽपि सदनं गत्वा बन्धुवर्गममेलयत् ॥ ११८ ॥ ततः

शृङ्गाररुचिरं कृतस्वस्त्ययनं सुतम् ॥ गजारूढं महर्द्ध्यासौ निन्ये नृप-
तिमन्दिरम् ॥ ११९ ॥ राजा संमुखमागत्य विधायोचितमादरम् ॥
पौरोहित्ये पदे चैनं न्ययोजयदतुच्छधीः ॥१२०॥ राजकार्यपटुः सोऽथ
विवेकोदयनिर्मलः ॥ विद्यानां पारदृश्वान्-क्रमान्नृपतिसंमतः॥१२१॥
विवेकमन्यदा तस्य परीक्षितुमना नृपः ॥ अपृच्छद्वत्स नोः कस्मा-ज्जी-
वानां विविधा स्थितिः ॥ १२२ ॥ प्रोवाच सुमतिं देव जानानोऽपि
भवानिदम् ॥ पृच्छत्यत्र प्रसादो हि हेतुस्तत्किंचिदुच्यते ॥ १२३ ॥
कर्मणामेव वैचित्र्या-ज्जीवा वैचित्र्यमागमन् ॥ भूमिकोचितवेषाणां
नानात्वाद्भरता यथा ॥ १२४ ॥ इत्यादिवचनैस्तस्य राजा प्रीतमना
भृशम् ॥ चक्रेऽस्खलद्गतिं शीघ्र-मेननमन्तःपुरादिषु ॥१२५॥ देवता-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिष्टदोषेण चलचित्तोऽयमेकदा ॥ विजने नृपतेर्हार-मालोक्यापज-
हार च ॥१२६॥ यावत्सशङ्कः संगोप्य तं द्रुतं तरलेक्षणः ॥ निर्याति
तावत्सहसा विवेकः प्रकटोऽभवत् ॥ १२७ ॥ दध्यौ च धिगहो राज्ये
निखिले करवर्त्तिनि ॥ मया विनिर्ममे मोहा-दर्हितं कर्म दुःखदम्
॥ १२८ ॥ अदत्तादानसदृशं पृथिव्यां नास्ति भीषणम् ॥ राजपू-
ज्योऽपि येनाद्य रङ्कादपि बिभेम्यहम् ॥ १२९ ॥ इतीवान्तर्व्याहरता
विवेकेनोपरोधितः ॥ हारं च स्तेयवृत्तिं च मुक्त्वागात्सुमतिर्बहिः
॥१३०॥ अथान्यदायं लावण्य-निर्जितानङ्ग आत्मवान् ॥ राज्ञीभिः
सस्पृहं दृष्टः कामबाणवशं ययौ ॥ १३१॥ कुमतीभूय सुमति-र्गन्तुं
तत्रोद्यतोऽभवत् ॥ यावत्तावदरौत्सीत्तं विवेको बन्धुसोदरः ॥ १३२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सोऽचिन्तयच्च यदहो महामोहविजृम्भितम् ॥ विचक्रे भोगसौस्थ्ये-
ऽपि यन्नाङ्गीष्वधमं मनः ॥ १३३ ॥ शिरश्छेदोऽत्र नरको-ऽमुत्र
स्यात्पारदार्यतः ॥ अकीर्तिश्च यथाहल्या-संगतः स्वःपतेरपि॥१३४॥
स हि धन्यतमो लोके यः सदा दूरतो वसेत् ॥ भुजङ्गीभ्य इवैताभ्यः
कुटिलाभ्यः परित्रसन् ॥ १३५ ॥ एवमालोच्य सुमति-स्ततो राजप-
रिग्रहे ॥ निर्विकारमना: सोऽभू-त्परनारीसहोदरः ॥ १३६ ॥ कौतु-
केनैकदा सोऽगा-त्सभिकानां निवेशने ॥ तत्राहूतो न केनापि प्रत्यु-
तायं तिरस्कृतः ॥ १३७ ॥ गालिप्रदानं कलहं छेदनं ताडनं तथा ॥
कुर्वाणांस्तान्समालोक्य स तु गाढं व्यरज्यत ॥ १३८ ॥ विवेकान्मा-
नसे चैवं व्यभावयदसौ कृती ॥ द्यूतं हि धुरि सर्वेषां व्यसनानामधि-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ष्ठितम् ॥ १३९ ॥ यद्वा किमुच्यतेऽनेन युधिष्ठिरनलादयः ॥ विडम्बि-
तास्तद्विदुषा नात्र स्थेयमपि क्षणम् ॥ १४० ॥ सुहृदेव विवेकेन द्यू-
तादेवं निवारितः ॥ सुमतिर्व्यसनत्यागा-ज्जाज्ञोऽनूदतिवल्लभः
॥ १४१ ॥ विश्वासो नैव कुत्रापि राज्ञा कार्य इति श्रुतम् ॥ तत्कथं
तव देवास्ति विश्वासोऽयं मयीदृशः ॥ १४२ ॥ एवं सुमतिना पृष्टो-
ऽन्यदा प्रोवाच नृपतिः ॥ सुमते वरलब्धस्त्व-मस्मद्वंशपुरोधसः
॥ १४३ ॥ तदीदृशः कथं वत्स विश्वासस्त्वयि नोचितः ॥ पुरोधा वि-
श्वासपात्रं वरलब्धो विशेषतः ॥ १४४ ॥ यद्येवं तर्हि किं गुप्तौ बा-
ल्येऽहं निदधेऽन्वहम् ॥ विश्वस्तं नैव बध्नाती-त्येवं सुमतिनोदिते
॥ १४५ ॥ राजा प्राहोदयं वत्स विवेकस्य प्रतीक्षितुम् ॥ विवेकार्को-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दये दोषाः समुज्झन्त्येव दोषताम् ॥ १४६ ॥ कुलादपि वरं शीलं वरं
दारिद्र्यमामयात् ॥ राज्यादपि वरं विद्या तपसोऽपि वरं क्षमा ॥१४७॥

यस्मात्कस्मात्प्रसूतोऽपि गुणवान्पूज्यते नरः ॥ सुवंशोऽपि धनुर्दण्डो
निर्गुणः किं करिष्यति ॥ १४८ ॥ इत्येतद्वचनं श्लाघा—गर्भितं नृप-
तेर्मुखात् ॥ श्रुत्वा स सुमतिस्तस्थौ विनयावनतो नृशम् ॥ १४९ ॥
सद्विवेकवशादेवं ध्वस्तदोषः सतां मतः ॥ सुमतिः सुगतिं प्राप स-
द्धर्माराधनात्क्रमात् ॥ १५० ॥ एवमन्योऽपि यो भव्यो विवेकमवल-
म्बते ॥ सद्गतिं समवाप्नोति स क्रमात्सुमतिर्यथा ॥ १५१ ॥ ज्येष्ठ
त्वमपि वेगेन विवेकालम्बनं कुरु ॥ विवेको मानवे देहे संसृतौ स तु
दुर्लभः ॥ १५२ ॥ सुखं पौद्गलिकं चैव सहजं च श्रुते श्रुतम् ॥ श्रे-



For Private and Personal Use Only

यस्तयोः किं तदिदं विवेकेन विनिर्णय ॥ १५३ ॥ सुखे पौद्गलिके तुच्छ–बुद्धिर्जीवस्य जायते ॥ विवेकस्य परा काष्ठा प्रोच्यते सा विवेकिभिः ॥ १५४ ॥ तुच्छबुद्धिर्यदा तस्मिन् जीवस्योत्पद्यते दृढा ॥ तदात्मरतिरेवासौ प्रायश्चारित्रमश्नुते ॥ १५५ ॥ ज्येष्ठ प्रमादमुत्सृज्य तद्विवेकं समाश्रय ॥ भवे भवे भुक्तमुक्तं सुखं पौद्गलिकं त्यज ॥ १५६ ॥ सुश्रावकोऽसि भव्योऽसि तपस्व्यसि सुधीरसि ॥ तत्त्वं विवेकालम्बेन चारित्री भव सुव्रत ॥ १५७ ॥ सद्गुरूणां मुखादेतां ज्येष्ठ आकर्ण्य देशनाम् ॥ गत्वा योधपुरं दीक्षां ग्रहीतास्मीत्यभावयत् ॥ १५८ ॥ तेनाथ दीक्षादानार्थं विज्ञप्ता मोहनर्षयः ॥ आगच्छामो योधपुर–मित्येवं प्रतिपेदिरे ॥ १५९ ॥ वियदब्ध्यङ्कभूमाने[१९४०] वत्सरे शोभने क्षणे ॥

For Private and Personal Use Only

ज्येष्ठे सिते च पञ्चम्यां ज्येष्ठो दीक्षां समाददे ॥ १६० ॥ श्रीमोहन-
र्षयो वास-क्षेपावसर आगते ॥ ज्येष्ठोऽयमद्यप्रभृति यशोनामेति ते
जगुः ॥ १६१ ॥ चतुर्मासीषु नवसु यत्तैर्यश उपार्जितम् ॥ यशोमु-
निमिषान्मूर्तं तदेवागादिह ध्रुवम् ॥१६२॥ दीक्षोत्सवस्तदा तत्र-त्यैः
श्राद्धैरनुरागिभिः ॥ यथा स्याच्छासनश्लाघा तथाकारि प्रमोदतः
॥ १६३ ॥ यशोमुनियुतास्तेऽथ विजह्रुर्मोहनर्षयः ॥ क्रमादजयमे-
र्वाख्यं पत्तनं च समागमन् ॥ १६४ ॥ व्योमाब्धिनंन्दभूमाने वत्सरे
तत्र तेनिरे ॥ दशमीं ते चतुर्मासीं यशोमुनिनिषेविताः ॥ १६५ ॥
इत्थं तैर्नविकप्रबोधकुशलैः शिक्षां सदा ग्राहितः स्वाचारे निपुणो
यशोमुनिरभूत्संसेवनात्सद्गुरोः ॥ यो भव्यं विदधाति धर्मनिपुणं बो-

धामृतं पाययन् यो भव्यश्च निषेवते गुरुपदं धन्या मतास्ते भुवि ॥ १६६ ॥ इति श्रीमत्पदवाक्यप्रमाणपारावारीण–विद्वन्मुकुटालंकार–श्री-बालकृष्णभगवच्चरणारविन्दमिलिन्दायमानान्तेवासिनः कानडोपाह्व–गोवि-न्दात्मज–दामोदरस्य कृतौ शाङ्के मोहनचरिते षष्ठादि–दशमावधि–चातुर्मास्यवर्णनं नाम षष्ठः सर्गः ॥ ६ ॥ ॥ ॥ ॥ ॥ ॥

॥ श्रीः ॥ नमः सिद्धेभ्यः ॥ शम्बूकगर्भसंकाश–कान्तिश्चन्द्रप्रभः प्रभुः ॥ अभीष्टां भवतां दद्या–द्बुद्धिं दर्शनगोचराम् ॥ १ ॥ अथ तेऽजयमेर्वाख्ये पत्तने मोहनर्षयः ॥ श्रीसंघं प्रीणयामासु–र्देशना-सुधयान्वहम् ॥ २ ॥ श्रीमोहनमुनीन्द्राणां यथा पुण्योदयस्तथा ॥ तत्रोत्सवतपस्याद्य–मभवत्पूर्वतोऽधिकम् ॥ ३ ॥ चतुर्मास्यां व्यती-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तायां समये शोभनेऽथ ते ॥ वियोगभीरुकान्भव्या–न्बोधयन्तो वि-
निर्ययुः ॥ ४ ॥ यशोमुनिस्तु भावेन वैयावृत्त्यं समाचरन् ॥ विहारं
॥५७॥ गुरुभिः सार्धं विततान महामनाः ॥ ५ ॥ दक्षिणास्ते दक्षिणस्या–
मथ यातुं प्रयेतिरे ॥ अपूर्वापूर्वदेशेषु विहारो हि सतां मतः ॥ ६ ॥
साहाय्यं नैव काङ्क्षेयुः कस्य चिन्मुनिसत्तमाः ॥ परं यदृच्छालब्धं
त–त्कुर्युर्न विफलं हि ते ॥ ७ ॥ यशोमुनेः साहाय्येन मुनीन्द्रास्ते
विशेषतः ॥ विहर्तुमनसस्तीर्थ–यात्रायै निश्चयं व्यधुः ॥ ८ ॥ प्राक्प-
ञ्चतीर्थीं कृत्वाग्रे प्रस्थितास्ते समागमन् ॥ सिद्धाचलमसंख्याताः
सिद्धा यत्र शिवं ययुः ॥ ९ ॥ भव्यानां पुण्यसंघातं संपिण्डितमिवै- ॥५७॥
कधा ॥ दृष्ट्वा सिद्धाचलं ते स्वं सफलं मेनिरे भवम् ॥ १० ॥ गिरि-

For Private and Personal Use Only

मारोहतां तेषां मोदो योऽभूत्पदे पदे ॥ लब्धबीजो भव्य एव जानी-
यात्तं नचेतरः ॥ ११ ॥ पुण्डरीके पुण्डरीक—मृषभं च जिनर्षभम् ॥
दृष्ट्वैनोऽनादिनिचितं कथाशेषं वितेनिरे ॥ १२ ॥ राजादनीं च तच्छाये
राजमानं पदद्वयम् ॥ प्रदक्षिणीकृत्य मुक्ते—र्मार्गे ते दक्षिणं व्यधुः
॥ १३ ॥ वीर्यगुप्तिर्यथा न स्या—न्न स्याच्च तदतिक्रमः ॥ तथा द्विस्त्रिः
प्रतिदिन—मारोहन्विमलाचलम् ॥ १४ ॥ यात्राणां नवनवते—रासी-
त्परिणानिर्दढा ॥ परं ते समयाभावा—द्विजहुश्चगात्रसंयुताः ॥ १५ ॥
अथ मल्लिजिनेशं ते भोयनीग्रामवासिनम् ॥ अभिवन्द्य पुरश्चेलु-
र्यशसा सहिता द्विधा ॥ १६ ॥ क्रमात्सिद्धपुरोपान्त—मागच्छन्मोह-
नर्षयः ॥ संघः पट्टनवास्येषा—मभून्मार्गप्रतीक्षकः ॥ १७ ॥ सिद्ध-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राजादयोऽभूवन् बहवो यत्र भूमिपाः ॥ येऽस्य गूर्जरराष्ट्रस्य प्रतत-
स्तम्भसंनिभाः ॥ १८ ॥ कुमारपालो भूपालो धर्मोन्नतिसहायकः ॥
यत्राभूदतिदातृत्वात् सुरद्रुरिव जङ्गमः ॥ १९ ॥ कलिकालेऽपि सर्व-
ज्ञ-नामधेयविभूषिताः ॥ शुष्यद्धर्मद्रुमारामो-द्भेदे जलदसंनिभाः
॥ २० ॥ मिथ्यात्वध्वान्तशमने शारदार्ककरोपमाः ॥ हेमचन्द्रा
जात्यहेम-निभा यत्रोदयं ययुः ॥ २१ ॥ युग्मम् ॥ प्रबोधिता हेम-
चन्द्रै-र्बहवो यत्र मानवाः ॥ मिथ्यात्वं दूरतस्त्यक्त्वा जिनधर्ममशि-
श्रियन् ॥ २२ ॥ पुरातनं पत्तनं य-ज्जैनानां परिकीर्त्यते ॥ यस्मिंश्च
समवासार्षु-राचार्या बहवः पुरा ॥ २३ ॥ लाभमालोक्य ते तस्मि-
न्नणहिल्लाख्यपत्तने ॥ संघेन तत्रत्येनाभि-नन्दिताः प्राविशन्मुदा



For Private and Personal Use Only

॥ २४ ॥ रागिणः श्रावका बोध–निष्णाता गुरवस्तथा ॥ योग ऐषां
भवेद्धर्म–वृद्धिस्तत्र किमद्भुतम् ॥ २५ ॥ श्राद्धानां रागिणां धर्म–ला-
भोऽस्त्विति विचिन्त्य ते ॥ तेषामत्युपरोधेन चतुर्मासीं समावसन्
॥ २६ ॥ अथ स्वाध्यायनिरतो यशोमुनिरभूत्तदा ॥ विहारविरतौ
प्रायः स्वाध्यायो यतिनां भवेत् ॥ २७ ॥ दृढसंहननत्वेन तपः षष्ठा-
ष्टमादिकम् ॥ विविधं तेन मुनिना चक्रे कर्मनिकृन्तनम् ॥ २८ ॥
प्रज्वलज्ज्वलनं यो वा–क्राम्येदभिलषन् सुखम् ॥ स एवाज्ञां सद्गु-
रूणां न मन्येत हताशयः ॥ २९ ॥ यशोमुनिस्तु गुर्वाज्ञा–तिक्रमं
फणिमस्तके ॥ पादन्याससमं मेने सच्छात्राणामियं स्थितिः ॥ ३० ॥
पितेव सत्सुतं दृष्ट्वा सच्छात्रं मोदते गुरुः ॥ सुतेभ्यो निर्विशेषा हि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





गात्राः प्रोक्ता महात्मभिः॥ ३१ ॥ यशोमुनेः सद्गुणत्वा–त्तया ते मोदमाप्नुवन् ॥ यथैवं मेनिरे गात्र ईदृशो दुर्लभः क्षितौ ॥ ३२ ॥ अथ पर्युषणं पर्व तथा नवपदावलिः ॥ सर्वं यथाभिलषित–मभून्मोहनपुण्यतः ॥ ३३ ॥ कश्चित्किमपि भावेन प्रत्याख्यानं समाददे ॥ सद्गुरूणां सेवनेन शुभा परिणतिर्भवेत् ॥ ३४ ॥ तत्रत्याः श्रावकाः प्राप्य मोहनर्षिसमागमम् ॥ यथाशक्त्युत्सवं तेनु–रुत्सवाद्वासनोन्नतिः ॥ ३५ ॥ भूम्यब्धिनन्दभूमाने वत्सरे पत्तनेऽवसन् ॥ एकादशीं चतुर्मासीं सद्यात्रा मोहनर्षयः ॥ ३६ ॥ अथासन्ने शीतकाले सौम्येष्वर्ककरेषु च ॥ शङ्खेश्वराख्यं पार्श्वं ते द्रष्टुमैच्छन्यतीश्वराः ॥ ३७ ॥ चित्रं यन्मोहनर्षीणां विहारः सुखदुःखकृत् ॥ पत्तनस्थाः प्रापुरार्तिं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुखं शङ्खेश्वरस्थिताः ॥३८॥ शङ्खेश्वरं नाम पार्श्व–मभिवन्द्य विधानतः ॥ गात्रेण सहिताश्चेलु–रग्रतो मोढनर्षयः ॥ ३९ ॥ अथ प्रह्लादनपुर–वासिनः श्रावकोत्तमाः ॥ श्रीमोढनागमं श्रुत्वा बभूवुर्वन्दनोत्सुकाः ॥४०॥ प्रह्लादनं नाम तस्य यथार्थं समजायत ॥ यन्मोढनागमाकर्ण्य सर्वेषां ह्लादकारि तत् ॥ ४१ ॥ प्रीत्या निवासयामासुः श्रावकास्तान्महामुनीन् ॥ अत्यासन्नां चतुर्मासीं वीक्ष्य तेऽप्यवसन्सुखम् ॥ ४२ ॥ भोक्तारः श्रावकाश्चित्रं साधवः परिवेषकाः ॥ गुरुभिः परिविष्टं ते पपुर्यद्देशनामृतम् ॥ ४३ ॥ अथैकः श्रावकस्तत्र बदरो नाम भद्रकः ॥ आगत्य प्रत्यहं भावा–द्वृणुते धर्मदेशनाम् ॥ ४४ ॥ इङ्गितज्ञानकुशला–स्तं विज्ञाय शुभाशयम् ॥ श्रीमो-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





हनमुनीन्द्रास्त-द्बोधनायैवमूचिरे ॥४५॥ बदरेह भवे धर्मा-दन्यत्किं
सारमीक्षसे ॥ सुखं यदिह तत्सर्वं धर्मादेवोपजायते ॥ ४६ ॥ राजा-
नोऽपि पुरा केचि-द्भुञ्जाना अपि संपदम् ॥ न राज्यं धर्ममेवेह सारं
सारार्थिनो विदुः ॥ ४७ ॥ तद्यथा भोजनामासी-द्राजा राजशिरो-
मणिः ॥ तमाह कश्चिदेवं भोः प्रेतेशस्त्वाङ्क्षयत्ययम् ॥ ४८ ॥ श्रुत्वा
तद्बोधवचनं भोजोऽभूद्धर्मतत्परः ॥ प्रतिबोद्धे बुधायादा-दुचितं पा-
रितोषिकम् ॥ ४९॥ एकदा नैष्किकस्याभू-द्विलम्बो द्वारि याचकः॥
आशिषः शतशो दत्त्वा स्वमभीष्टमयाचत ॥ ५० ॥ स्वालंकारं वि-
तीर्यास्य भोजोऽभीष्टमपूरयत् ॥ तदा पार्श्वचरैः पृष्टः प्रत्याहैवं च
भूमिपः ॥५१॥ उत्थायोत्थाय बोद्धव्यं किमद्य सुकृतं कृतम्॥आयुषः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

खण्डमादाय रविरस्तं प्रयाति हि ॥ ५२॥ लोकः पृच्छति मां वार्ता शरीरे कुशलं तव॥कुतः कुशलमस्माक-मायुर्याति दिने दिने॥५३॥ श्वःकार्यमद्य कुर्वति पूर्वाह्ने चापराह्निकम्॥ मृत्युर्न हि परीक्षेत कृतं वास्य न वा कृतम्॥ ५४ ॥ मृता मृत्युर्जरा जीर्णा विपन्नाः किं विपत्तयः॥ व्याधयो बाधिताः किं नु हृष्यन्ति यदमी जनाः॥ ५५ ॥ अनित्यभावनामेवं भावयन्स नराधिपः॥ विधायावहितो धर्मं प्रान्ते स्वर्गतिमासदत् ॥ ५६ ॥ सत्वरं बदरैवं त्वं जिनोक्तं धर्ममाश्रय॥ देशसर्वविरत्याख्यः स धर्मो द्विविधः श्रुतः॥ ५७ ॥ शक्तिश्च परिणामश्च यदि स्यात्पूर्वपुण्यतः॥ तत्सर्वविरतिं मुक्ति-रमणीदूतिकां श्रयेत् ॥ ५८॥ विना यत्सर्वविरतिं मुक्तिद्वारमपावृतम्॥ कर्तुं न

For Private and Personal Use Only

मो० कोऽपि प्रभवे–त्तस्मादेषा प्रशस्यते ॥ ५९ ॥ यदि निर्वहणे शक्तिः स० ७
परिणामोऽपि सुस्थिरः ॥ तदिमां सर्वविरति–मुररीकुरु भद्रक ॥६०॥
॥६१॥ निशम्यैतत्सद्गुरूणां वचो निर्वेदगर्भितम् ॥ चारित्रग्रहणे गाढ–नि-
श्चयोऽसौ तदाभवत् ॥६१॥ व्यजिज्ञपच्च मां दीनं समुद्धर्तुं भवार्ण-
वात् ॥ चारित्रं तरणीकल्पं दयया दातुमर्हथ ॥ ६२ ॥ परिणामःप-
रीक्ष्योऽस्य विचिन्त्येति मुनीश्वराः॥ददुर्नैश्चयिकं नैव तस्मै प्रतिवच-
स्तदा ॥ ६३ ॥ यथा वर्षात्यये मेघा–वरणं नाशमासदत् ॥ तथो-
पदेशाद्भव्यानां ज्ञानावरणमञ्जसा ॥ ६४ ॥ यथापूर्वमभूत्तत्र धर्मो-
न्नतिरनुत्तमा ॥ मनःप्रसत्तिश्च सर्व–भव्यानां गुरुलाभतः ॥ ६५ ॥ ॥६१॥
चातुर्मास्येऽथ निर्वृत्त ऋतौ च विहतिक्रमे ॥ सिद्ध्येन्न वा ममाभीष्टं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बदरश्चेत्यचिन्तयत् ॥ ६६ ॥ नेत्राब्धिनन्देधरणी–मितेऽब्दे मोहन-
र्षयः ॥ तपोमितां चतुर्मासी–मूषुः प्रह्लादने पुरे ॥ ६७ ॥ अथो वि-
हारसमये विज्ञप्त मोहनर्षयः ॥मार्गे प्रतीक्ष्योऽवसरो बदरं तेऽवद-
न्निति ॥ ६८ ॥ यशोमुनिर्द्वितीयास्ते डीसाख्यं पुरमागमन् ॥ बदरोऽ
प्याजगामाशु शुभकर्मोदयेरितः ॥ ६९ ॥ श्रीमोहनानुजिघृक्षा बद-
रस्यागमस्तथा ॥ मुहूर्तासन्नतेत्येवं त्रितयं संगतं तदा ॥ ७० ॥
विक्रमाद्गुणवेदाङ्क–जगतीमितवत्सरे ॥ मार्गेऽसिते द्वितीयायां चारित्रं
बदरोऽग्रहीत् ॥ ७१ ॥ यशश्चारित्रजनितं कान्त्येदानीं समागमत् ॥
इतीव विदधे कान्ति–मुनिरित्यस्य नाम तैः ॥ ७२ ॥ समं शिष्य-
द्वयेनाथ संयतास्ते यथाक्रमम् ॥ विहरन्तोऽर्बुदगिरौ जिनाधीशान्व-

For Private and Personal Use Only

वन्दिरे ॥ ७३ ॥ पञ्चतीर्थीं तथान्यानि तीर्थान्यासेव्य भावतः ॥ स-
शिष्या मुनिवर्यास्ते पुरं योधपुरं ययुः ॥ ७४ ॥ तत्र कान्तिमुनेस्तेऽथ
छेदोपस्थापनं व्यधुः ॥ श्राद्धैस्तदानीं विदध उत्सवो भावतो महान्
॥ ७५ ॥ तत्रोपरोधात्कार्याच्च स्थित्वा मासत्रयं ततः ॥ प्रापुः पुरीं
फलवतीं श्राद्धैरभ्यर्थिता भृशम् ॥ ७६ ॥ गमनागमने पूर्व–मत्राहं
बहुशोऽवसम् ॥ वर्षावासः पुनर्नास्मि–न्नद्ययावदभूत्किल ॥ ७७ ॥
इति संचिन्त्य मनसि श्राद्धाशां मोहनर्षयः ॥ अपूरयन्यतः सन्तः
प्रमाद्यन्त्युचिते नहि ॥ ७८ ॥ गुणाब्धिनन्दभूमाने (१९४३) वत्सरे ते सुसं-
यताः ॥ त्रयोदशीं चतुर्मासी–मूषुः फलवतीपुरे ॥ ७९ ॥ सर्वान्नीनो-
ऽपि सुहितो मिष्टमप्यन्नमुज्झति॥परं फलवतीसंघ–स्तृप्तोऽप्यौज्झन्न



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तान्गुरून् ॥ ८० ॥पुण्याहेऽथ विजहृस्ते शिष्याभ्यां सहिता मुदा ॥
पुरं जेसलमेराख्यं जग्मुश्च स्पर्शनावशात् ॥ ८१ ॥ ततो निवृत्ता
निषेव्य पञ्चतीर्थीं विशुद्धिदाम् ॥ भूयो ववन्दिरे भावा-दर्बुदे तीर्थ-
नायकान् ॥ ८२ ॥ अथावतरतां तेषा-मर्बुदाद्रेरुपत्यकाम् ॥ मुनि वे-
षधरः कश्चि-द्भव्यो दृष्टिपथं ययौ ॥ ८३ ॥ आगत्यासौ मोहना-
ङ्घ्रि-पङ्कजान्यभ्यवन्दत ॥ शातमापृच्छ्य पुरतो-ऽतिष्ठच्च विनया-
न्वितः ॥ ८४ ॥ सरलप्रकृतिर्बोध-योग्योऽयमिति निश्चयात् ॥ ऊचे
तैर्मुनिभिः किं त्व-मेकाकी पर्यटन्नसि ॥८५॥ स प्राह गीतार्थो वेषः
स्वयमेवायमादृतः ॥ कर्मनिर्मूलनार्थं च तीर्थयात्रां करोम्यहम्॥८६॥
गुरवः प्रोचिरे भव्य धीरोऽसि मतिमानसि॥ संविग्नोऽसि परं किंचि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्कथयामि शृणुष्व तत् ॥ ८७ ॥ यथोत्पथचरो वाहो विना सूतं
विनश्यति ॥ तथा चारित्रीह युवा सद्गुरूनन्तरा ध्रुवम् ॥ ८८ ॥ देवे
गुरौ च धर्मे चे-च्छ्रद्धा निरतिचारिणी ॥ सफलं तर्हि कर्मात्र दृष्टान्तं
लौकिकं शृणु ॥ ८९ ॥ कानने क्वचिदेकान्त आसीदेकः शिवालयः॥
तत्रैकः शबरो नित्य-मागत्यापूजयच्छिवम् ॥ ९० ॥ अनभिज्ञो जा-
तिहीनो-ऽप्यसौ श्रद्धासमन्वितः ॥ पुष्पाण्यवचिनोत्यादौ गत्वा-
टव्यां यथारुचि ॥ ९१ ॥ स्नात्वार्द्रवपुरम्भोभि-र्मुखमापूर्य सत्व-
रम् ॥ पादेन शिवनिर्माल्यं निपातयति लीलया ॥ ९२ ॥ तिष्ठन्ग-
ण्डूषपातेन स्नपयित्वा शिवं रयात् ॥ पुष्पाणि मस्तके क्षिप्त्वा याति
शीघ्रं यथागतम् ॥ ९३ ॥ विप्रोऽपि कश्चिदायाति शिवपूजार्थम-



For Private and Personal Use Only

न्वहम् ॥ विधिनार्चति गौरीशं स्तुत्वा नत्वा च गच्छति ॥ ९४ ॥
प्रातरायाति विप्रोऽसौ तदा पूजां स्वयंकृताम् ॥ निष्काशितां नवीनां
च रचितामवलोकते ॥ ९५ ॥ कोऽयं धृष्टः पूर्वकृतां पूजां निष्काश्य
हेलया ॥ आरण्यकानि पुष्पाणि क्षिपति स्थाणुमूर्धनि ॥ ९६ ॥ इति
संचिन्त्य कोपात्स तस्थौ तं प्रति पालयन् ॥ शबरोऽपि यथापूर्व-
मागत्यापूजयच्छिवम् ॥ ९७ ॥ निर्याते शबरे विप्रो रोषारुणितलो-
चनः ॥ शिवं निर्भर्त्सयामास वचोभिर्निष्ठुरैर्भृशम् ॥ ९८ ॥ ततः
शिवोऽवदद्विप्र-मविनीतोऽप्यसौ द्विज ॥ श्रद्धालुर्भक्तिमांश्चेति तु
ष्याम्यस्यार्चया भृशम् ॥ ९९ ॥ प्रातः श्रद्धास्य द्रष्टव्ये-त्येवं श्रुत्वा
शिवोदितम् ॥ विप्रोऽगाद्दुर्मनाः प्रातः पुनरागाद्दिदृक्षया ॥ १०० ॥

द्वारमुद्घाट्य नत्वा च शिवमूर्तिमवेक्षते ॥ दक्षिणं नयनं ताव–दस्या उत्कृत्तमैक्षत ॥ १०१ ॥ अनर्चनीया भग्नेयं प्रतिमेत्यपसृत्य सः ॥ दूरेऽस्थाद्धवरं द्रष्टुं भृशमुत्सुकमानसः ॥ १०२ ॥ आगत्य शबरो मूर्तिमक्षिहीनां विलोक्य च ॥ निजमुत्कृत्त्य नयनं तस्यां शीघ्रं न्यवेशयत् ॥ १०३ ॥ ततः प्रसन्नः शबरा–भीष्टं शंभुरपूरयत् ॥ विप्रस्तु विमनाः श्रद्धा–माहात्म्यमबुधत्स्वयम् ॥ १०४ ॥ एवं त्वमपि देवादि–त्रिके श्रद्धायुतो भव॥आज्ञावर्ती सद्गुरूणां भूत्वा सुखमवाप्नुयाः ॥ १०५ ॥ श्रुत्वैतद्वचनं सोऽथ गुरवः शरणं मम ॥ इत्युक्त्वा मोहनमुनि–चरणान् भावतोऽनमत् ॥ १०६ ॥ स्वयमादृतवेषाय तस्मै दीक्षां यथाविधि ॥ ददुर्मुनिवरास्तेऽथ खराडीसंनिवेशने ॥ १०७ ॥



For Private and Personal Use Only

यतोऽस्य दीक्षावसरे ननन्दुरखिला जनाः ॥ ततो हर्षमुनिर्भूया-
न्नाम्नायमिति तेऽभ्यधुः ॥ १०८ ॥ अब्ध्यब्धिनन्दभूमाने [१९४४] वैक्रमे व-
त्सरे शुभे ॥ चैत्रे सिते तथाष्टम्यां लग्ने हर्षमुनिर्व्रतम् ॥ १०९ ॥
यशःकान्ती लभेयातां सुकृतैः पूर्वसंचितैः ॥ हर्षः संगच्छेत तत्र यदि
तद्युक्तमेव तत् ॥ ११० ॥ शिष्यत्रययुतास्तेऽथ संविग्ना मोहनर्षयः ॥
विहरन्तः क्रमाद्राज-नगरं समवाप्नुवन् ॥ १११ ॥ धर्मक्रियासु कुश
लान् श्राद्धांस्तत्र विवेकिनः ॥ दृष्ट्वापरिमितं मोद-मासदंस्ते सुसं-
यताः ॥ ११२ ॥ दृष्ट्वा क्षेत्रं गुणोपेतं श्रावकान्निपुणांस्तथा ॥ रा-
गिणामुपरोधं च वर्षावासं प्रपेदिरे ॥ ११३ ॥ यथापूर्वमभूत्तत्र चतु-
र्मासी निरत्यया ॥ तपस्या विविधा यस्मा-त्तत्रत्यानां हि सा प्रिया

For Private and Personal Use Only

॥ ११४ ॥ ततः सिद्धाचलं गन्तु-मैछंस्ते मुनिपुङ्गवाः ॥ परं हर्षमुने-
र्गात्रे वाताङ्गदभवद्रुजा ॥ ११५ ॥ यशोमुनिं वैयावृत्त्य-कृते तत्र
न्यवासयन् ॥ स्वयं च कान्तिमुनिना विजहुर्मोहनर्षयः ॥ ११६ ॥
वेदार्णवाङ्कभूमाने वत्सरे राजपत्तने ॥ चतुर्दशीं चतुर्मासीमूषुस्ते
मुनिनायकाः ॥११७॥ गछन्तो भोयनीवासि-मल्लिनाथं च वर्त्मनि॥
अभिवन्द्य तथान्यानि तीर्थान्यासेव्य भावतः ॥ ११८ ॥ तत्र तत्र
निवासेन कृत्वा धर्मपरान्नरान् ॥ क्रमात्सिद्धाचलं दृष्ट्वा सिद्धार्थं जन्म
मेनिरे ॥ ११९ ॥ एकोनशतयात्रास्ते पूर्वोद्दिष्टाः प्रचक्रिरे ॥ सुकृतो-
दयतस्तत्र नान्तरायस्तु कोऽप्यभूत् ॥ १२० ॥ तदा कान्तिमुनिः
श्रीम-द्गुरूणां सेवयानिशम् ॥ समयं यापयामास वैयावृत्त्यं हि दुर्ल-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्नम् ॥ १७१ ॥ एकोनशतयात्रासु पूर्णास्वथ समन्ततः ॥ विहृत्य वर्षावसतिं पुनः सिद्धगिरौ व्यधुः ॥ १७२ ॥ सत्तीर्थसांनिध्यात्तत्र सद्गुरूणां च लाभतः ॥ भविका बहवो जीवा–श्चतुर्मासीं तदावसन् ॥ १७३ ॥ श्रीमोहनमुखोद्भूतां सुधां श्रवणगोचराम् ॥ उपत्यकाया द्रष्टव्यं सिद्धाद्रिं दृक्सुधां तथा ॥ १७४ ॥ पिबन्तः श्रावका एक–सुधापानान् दिवौकसः ॥ जहसुः सत्तीर्थगुर्वोः सेवया किं सुदुर्लभम् ॥ १७५ ॥ महाव्रतनदीश्वरांङ्कधरणी[1] मिते वत्सरे निषेव्य मुनिमोहनाङ्घ्रिकमलं मुदा भावुकाः ॥ यथासुखमयापयन्व्रतरताश्चतुर्मासकम् झटित्यघहरे तदा विमलगिर्युपान्त्ये पुरे ॥ १७६ ॥ ॥

१ अस्य पृथ्वी छंदः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इति श्रीमत्पदवाक्यप्रमाणपारावारीण–विद्वन्मुकुटालंकार–श्री बालकृष्ण-भगवच्चरणारविन्दमिलिन्दायमानान्तेवासिनः कानडोपाह्व-गोविन्दात्मज–दामोदरस्य कृतौ शाङ्के मोहनचरित एकादशादि–पञ्चदशावधिचातुर्मास्यवर्णनं नाम सप्तमः सर्गः ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥

॥ श्रीः ॥ नमः सिद्धेभ्यः ॥ शंभुर्मुक्तिसुखप्राप्ति–हेतुत्वाद्यः प्रकीर्त्यते ॥ स आद्यनाथो भवतां सुमतिं ददताद् द्रुतम् ॥ १ ॥ अथ श्रीमोहनमुनि–कीर्तिदूती धरातले ॥ परिभ्रमन्ती संप्राप पत्तनं सुरताभिधम् ॥ २॥ मन्त्रयित्वाथ किमपि श्रावकश्रवसोरसौ ॥ वशीचकार तान्दौत्यं परं संवननं यतः ॥३॥ मिलित्वा तेऽथ सिद्धाद्रिं सद्गुरूंश्चाभिवन्दितुम् ॥ प्रतस्थिरेऽल्पपुण्यानां योगोऽयमतिदुर्लभः ॥ ४ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विमलाद्रिपुरे श्रीम–न्मोहनाङ्घ्रिसरोरुहम् ॥ अभिवन्द्याध्यरोहंस्ते श्रावका विमलाचलम् ॥ ५ ॥ अथ श्रीमोहनमुनीन् विनीतास्ते व्यजिज्ञपन् ॥ श्रीमद्भिः सूर्यनगरं पाव्यतां पादपांसुभिः ॥ ६ ॥ आगामिनी चतुर्मासी श्रीमच्चरणसेवया ॥ भूयान्नः सफलेत्येवं चिरमाशास्महे वयम् ॥ ७ ॥ एवमभ्यर्थिताः श्राद्धैः प्रत्यूचुर्मोहनर्षयः ॥ यत्र स्यात्स्पर्शना तत्र जीवोऽयं नीयते बलात् ॥ ८ ॥ आरभ्य कार्तिक्या यात्रा यावन्त्यो मनसीप्सिताः ॥ तासु पूर्णासु गुरवो बभूवुर्विजिहीर्षवः ॥ ९ ॥ तदावसरमालोक्य विज्ञप्तास्ते पुनः पुनः ॥ प्रपेदिरे श्राद्धवचो भावः किं विफलो भवेत् ॥ १० ॥ प्राक्तनं सुकृतं येषा–मुदियाय सुकर्मणाम् ॥ ते तान्विहरतः सेव–माना अनुययुः पथि

For Private and Personal Use Only

॥ ११ ॥ विहारक्रमतः प्राप्ता गुरवः स्तम्भनं पुरम् ॥ तत्र श्रीपार्श्व-
मानम्य भृगुकच्छमथासदन् ॥ १२ ॥ सुव्रतस्वामिपादाब्जं नत्वा तत्र
मुनीश्वराः ॥ सुश्रावकैर्युताः सूर्य-पुरप्रान्ते पदं न्यधुः ॥ १३ ॥ तदा
सूर्यपुराच्छ्राद्धा गुरूंस्तानभिवन्दितुम् ॥ आयातास्तान्समालोक्य
प्रमोदं घनमासदन् ॥ १४ ॥ प्रशंसभिस्ततः सूर्य-पुरस्थैः श्राव-
कैर्युताः ॥ सुलग्ने गात्रसहिता गुरवः प्राविशन्पुरम् ॥ १५ ॥ तदा
मङ्गलगीतेन वादित्राणां रवेण च ॥ जयघोषेण भव्याना-मभूद्ध्वनिमयं
पुरम् ॥ १६ ॥ वातायनस्थवामानां विकचैर्मुखपङ्कजैः ॥ उपहारं मु-
नीन्द्रेभ्यो ददतीव पुरी बभौ ॥ १७ ॥ जैनविद्योत्तेजिकया पर्षदाग- ॥६७॥
मवर्त्मनि ॥ नृत्यन्तीव पुरी रेज-दुच्छ्रितैर्ध्वजतोरणैः ॥ १८ ॥ अथ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वगुणोपेते क्षेत्रे तस्मिन्विचक्षणाः ॥ धर्मबोधं वितन्वाना न्यवस-
न्मोहनर्षयः ॥ १९ ॥ केषांचित्सुरते रम्ये निरतानामपि क्षणात् ॥
देशतो विरतिर्जज्ञे सद्गुरूणां प्रसादतः ॥ २० ॥ कश्चिद्द्रव्यपरीणामं
कश्चिद्दिग्विरतिं तदा ॥ एवं सद्गुरुतः श्राद्धाः प्रत्याख्यानं ललुर्मुदा
॥ २१ ॥ प्रकृत्योदारचित्तास्ते श्राद्धाः सुरतवासिनः ॥ श्रीमोहनपद-
स्पर्शा-दभवन्धर्मतत्पराः ॥ २२ ॥ कषायबहुला धर्म-विमुखाः
श्रावका अपि ॥ श्रुत्वा श्रीमोहनर्षीणां देशनां धर्मिणोऽभवन् ॥२३॥
केचिड्ढुण्ढकसंसर्गा-द्भ्रष्टा धर्माज्जिनोदितात् ॥ तेऽपि सद्गुरुसांनि-
ध्या-दभवन्प्रतिमार्चकाः ॥ २४ ॥ अथो महेशानवासी कश्चिदुद्यम-
नामभाक् ॥ तथापरो मालवीयो राजमल्लाभिधस्तदा ॥२५॥ श्रीमो-

For Private and Personal Use Only

हनेन्दुसंभूतां पीत्वा सद्देशनासुधाम् ॥ सुखं वैषयिकं सर्व–ममन्येतां विषोपमम् ॥ २६ ॥ युग्मम् ॥ संवेगलाभाच्चारित्रं लिप्सुभ्यां मोहन-र्षयः ॥ ताभ्यामभ्यर्थिता दीक्षां ददुः संसारतारिणीम् ॥ २७ ॥ विक्र-मार्द्विशशतक–षट्चत्वारिंशवत्सरे ॥ ज्येष्ठस्य कृष्णैकादश्या–मेष दीक्षोत्सवोऽभवत् ॥ २८ ॥ उद्द्योतनामा प्रथमो द्वितीयो राजना-मकः॥ भूयादित्यवदन्वास–क्षेपे श्रीमोहनर्षयः ॥ २९ ॥ यशःकान्ती हर्षराजा–वुद्द्योतश्चेति पञ्चकम् ॥ यदीयपादसंलग्नं तन्माहात्म्यं ब्रुवे कियत् ॥ ३० ॥ चतुर्मास्यां प्रवृत्तायां मुनिमोहनदेशनाम् ॥ श्रोतुं समाययुः श्राद्धाः शतशोऽथ सहस्रशः ॥ ३१ ॥ गात्राणां पञ्चकं वैया–वृत्त्ये तपसि चानघे ॥ स्वाध्याये चासक्तमभू–त्रयमेतन्मतं स-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ताम् ॥३२॥ वार्षिकं पर्व महता महेन श्रावकास्तदा ॥ धर्मं चतुर्विधं
भावा–दाराध्य सफलं व्यधुः ॥ ३३ ॥ आष्टाह्निकोत्सवः स्नात्रं पूजा
च विविधं तपः ॥ श्रीमन्मोहनमाहात्म्या–न्निर्विघ्नमभवत्किल ॥३४॥
शोभनानि निमित्तानि विहारं निकटागतम् ॥ वीक्ष्य ते भविकः क-
श्चि–द्बुध्येतेत्यनुमेनिरे ॥ ३५ ॥ अथ लाटनिवास्यागा–त्कश्चिद्भगण-
नामकः ॥ श्रीमोहनमुनीन्नत्वा देशनां शुश्रुवेऽमलाम् ॥ ३६ ॥ ला-
भमालोक्य भूयोऽपि बोधितो मोहनर्षिभिः ॥ स धर्मतत्त्वं विज्ञाय
परं संवेगमासदत् ॥ ३७ ॥ दृढां परिणतिं ज्ञात्वा तस्मै भवतिती-
१९४७
र्षवे ॥ मुनीन्द्रास्ते ददुर्दीक्षां कर्मसंघातनाशिनीम् ॥ ३८ ॥ मुन्य-
ब्धिनन्दभूसंख्ये वैक्रमेऽब्दे समाददे ॥ माघेऽसिते च पञ्चम्यां भगणः

For Private and Personal Use Only

स महाव्रतम् ॥ ३९ ॥ तस्याख्या देवमुनिरि–त्यभवत्सद्गुरूदिता ॥
छेदोपस्थापनमथ पूर्वदीक्षितयोरभूत् ॥ ४० ॥ ततो यशोमुनेश्छात्रो
गुणनामात्तसंयमः ॥ रुजार्दितोऽभवत्पूर्व–कृतकर्मोदयादसौ ॥ ४१ ॥
वैयावृत्त्यार्थमेतस्य तत्र राजमुनिं न्यधुः ॥ स्वयं छात्रयुतास्तेऽथ वि-
हर्तुमनसोऽभवन् ॥ ४२ ॥ तदा मोहमयीवासी संघस्तान्मुनिसत्त-
मान् ॥ व्यजिज्ञपन्मोहमयी पावनीयेति सादरम् ॥ ४३ ॥ प्रस्तुतां
षोडशीमेतां चतुर्मासीं यथासुखम् ॥ निवस्य ते मुनिवरा विजहुः
समये शुभे ॥ ४४ ॥ विज्ञप्तिमुररीकृत्य प्रस्थिता दक्षिणां दिशम् ॥
समं छात्रैः श्रावकैश्च दमनाख्यं पुरं ययुः ॥४५॥ तत्र मोहमयीवासी
संघः सहयियासया ॥ आगत्य मोहनमुनी–न्ववन्दे हृदि रागवान्

॥ ४६ ॥ श्रीमोहनमुखाद्धर्म–लाभं श्रुत्वा सुदुर्लभम् ॥ अलब्धपूर्व-मानन्द–माप्नोत्संघः स भाग्यवान् ॥ ४७ ॥ मोहमय्या नातिदूरे पुरमाकाशनामकम् ॥ चैत्रेऽसिते समाजग्मुः ससंघा मोहनर्षयः ॥ ४८ ॥ तत्रस्थजिनचैत्येऽभू–दुत्सवो दिवसत्रयम् ॥ मुम्बापुर्याश्च बहव आजग्मुर्भविका जनाः ॥ ४९ ॥ चैत्रे सिते तिथौ षष्ठ्यां मुम्बा-परिसरे शुभे ॥ उद्यानान्तर्वाटिकाया आगमन्मोहनर्षयः ॥ ५० ॥ सप्तम्यां मोहनमुनि–स्वागताय समाययुः ॥ सहस्रशो जनाः प्रात–र्गुरुपादान्ववन्दिरे ॥५१॥ विचित्रवेषालंकारै–श्चारुपुष्परथस्थितैः ॥ वाजित्रसहितैरग्रे–यायिभिर्बालकैः शुभैः ॥ ५२ ॥ मधुरान्दूणवाजि-त्र–स्वरानाकर्ण्य नन्दितैः ॥ पृष्ठानुयातैः शृङ्गार–रुचिरैः श्रावकैर्वरैः

॥ ५३ ॥ नेपथ्यरत्नालंकार—रुचिराभिः सहस्रशः ॥ श्राविकाभिश्च
मधुरं गायन्तीभिर्गुरोर्गुणान् ॥ ५४ ॥ जयघोषैश्च गम्भीरै—रुद्घुष्टै-
रन्तरान्तरा ॥ मध्ये विराजमानैश्च सशिष्यैर्मोहनर्षिभिः ॥ ५५ ॥
मनोहरं समालोक्य प्रवेशोत्सवमादरात् ॥ मुम्बापुरीस्थाः सफलं
मेनिरे दृष्टिसौष्ठवम् ॥ ५६ ॥ कुलकम् ॥ ततः सपरिवारास्त आज-
ग्मुर्मोहनर्षयः ॥ वसतिं नगरीमध्य—वर्तिनीं प्राशुकां वराम् ॥ ५७ ॥
देशनायां च संबाध—स्तत्राभूद्घ्राणगोचरः ॥ तिलोऽप्युपरिवर्ती य—
न्नान्तरन्तरमासदत् ॥ ५८ ॥ व्याख्यानशालां विस्तीर्णां तदा संघो
न्यवेशयत् ॥ सहस्रपञ्चकं यत्रो—पविशेन्नृण्वतां नृणाम् ॥ ५९ ॥ ॥७०॥
पुरी मोहमयी तत्र व्याख्याता मोहमोहनः ॥ यदि तत्किं नरा नैव

बुध्येरन्नुपदेशतः ॥ ६० ॥ धर्मश्रवणतो भव्या व्यधित्सन्विविधं
तपः ॥ गुर्वाज्ञया पञ्चरङ्गी-तपः प्रागाड्रियन्त च ॥ ६१ ॥ व्रतिनां
सप्तशत्या त-दन्वष्ठीयत भावतः ॥ ततः पर्युषणं पर्व दुर्लभं च
समागमत् ॥ ६२ ॥ द्विषष्टिभक्तप्रत्याख्या चतुर्भिरुररीकृता ॥ द्वाभ्यां
वेदाब्धि[४४]संख्यानां भक्तानां त्याग आदृतः ॥ ६३ ॥ चत्वारिंशन्मितं
चैकः प्रत्याख्यादशनादिकम् ॥ चतुस्त्रिंशन्मितानि द्वौ द्वौ द्वात्रिंश-
न्मितानि च ॥ ६४ ॥ द्वाविंशतिं च द्वाभ्यां ता-मधिकां च शतं नराः ॥
सार्धद्विशत्या भक्तानि त्यक्तान्यष्टादशापि च ॥ ६५ ॥ शतैश्च पञ्च-
दशभि-स्तपोऽष्टममुरीकृतम् ॥ षष्ठानां चोपवासानां संख्यां कर्तुं
क्षमेत कः ॥ ६६ ॥ एवंविधा तपस्याभू-त्तदा पर्वणि शोभने ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कल्पोत्सवो भोगिचन्द्र–श्राद्धेनाकारि भावतः ॥ ६७ ॥ ततोऽक्षय-
निधिं नाम तपः स्वीचक्रुरार्हताः ॥ शतत्रयमितास्तच्च विना विघ्नं
समाप्यत ॥ ६८ ॥ आश्विने च सिते भव्यै–रागमाख्यं महत्तपः ॥
चक्रे त्रिशत्या तदाभू–त्पूजास्नात्रादि शान्तिदम् ॥ ६९ ॥ समेता-
द्रेश्च समव–सरणस्यागमस्य च ॥ संनिवेशो यथाशास्त्रं संघेनाकारि
भावतः ॥ ७० ॥ तस्योत्सवः प्रववृते नृणामुत्साहवर्धनः ॥ प्रत्यहं
महती पूजा–भवद्दीपोत्सवोऽपि च ॥ ७१ ॥ पूजादीपोत्सवाद्यासु तदा
धर्मक्रियासु च ॥ धनाढ्याः श्रावकाश्चक्रुः स्पर्धया द्रविणव्ययम् ॥७२॥
मासं यावदभूदेव–मुत्सवो मोदवर्धनः ॥ सपादलक्षप्रमितं द्रव्यं
विव्याय तत्र च ॥ ७३ ॥ तदा भव्यशतं भावा–च्चतुर्थं व्रतमाददे ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परस्त्रीत्यागनियमं सहस्त्राणां चतुष्टयम् ॥ १४ ॥ एवं सहस्त्रशः प्रत्या–ख्यानानि भविका जनाः ॥ श्रीमोहनमुनीन्द्राणां सकाशाद्ज्जगृ-न्हिरे तदा ॥ १५ ॥ बुध्धिसिंहाभिधः श्रेष्ठी श्रीमोहननिदेशतः ॥ शा-लार्थमददाद्वित्तं सहस्त्राणि च षोडश ॥ १६ ॥ एवं धर्मोन्नतिकरीं चतुर्मासीं महर्षयः ॥ ऊषुः सप्तदशीं मुम्बा–पुर्यां गात्रसमन्विताः ॥ १७ ॥ अथैको राजनगर–वासी सकलनामकः ॥ तथानन्दपुरा-वासो हरिगोविन्दनामभाक् ॥ १८ ॥ द्वावेतौ मोहनमुनि–मुखादा-कर्ण्य देशनाम् ॥ संसारानित्यतां ज्ञात्वा प्रव्रज्यां लातुमैच्छताम् ॥ १९॥ चतुर्मासीमुपासातां मोहनाङ्घ्रिसरोरुहम् ॥ तदा प्रसादं लेभाते सेवया हि स लभ्यते ॥ २० ॥ सिते मार्गस्य पञ्चम्यां चारित्रं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लतुश्च तौ ॥ अभूदद्भूतपूर्वश्च तदा निष्क्रमणोत्सवः ॥ ८१ ॥
प्रथमः सुमतिर्नाम द्वितीयो हेमनामकः ॥ अभूतां तौ सद्गुरूणां प्र-
सादात्किं नु दुर्लभम् ॥ ८२ ॥ अथैकदा धर्मचन्द्र–नामा धर्मक्रिया-
परः ॥ श्रीमोहनमुखाद्धर्मं श्रुत्वाभिग्रहमाददे ॥ ८३ ॥ चतुर्विधेन
संघेन न यावद्विमलाचलम् ॥ गच्छेयं विधिना ताव–दैह्यवं मे न क-
ल्पते ॥ ८४ ॥ युग्मम् ॥ विजिहीर्षून्मोहनर्षीन् रागिणः श्रावकाः
पुनः ॥ न्यवासयन्को नु वाञ्छे–द्वियोजयितुमम्ृतम् ॥ ८५ ॥ विहार-
निश्चयमथो ज्ञात्वा तेषां महात्मनाम् ॥ संघः संमील्य तान्प्रेम्णा
सच्चकार मुनीश्वरान् ॥ ८६ ॥ माघेऽसिते तृतीयायां प्रभाते मोहन-
र्षयः ॥ विहृत्य सपरीवारा मुम्बापरिसरे ययुः ॥ ८७ ॥ दयाचन्द्रस्यो-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परोधा–त्स्थित्वा तत्र कियच्चिरम् ॥ यथागतं विहृत्याथ प्राप्नुवन्
सुरतं क्रमात् ॥ ८८ ॥ अष्टादशीं चतुर्मासीं तत्रैव न्यवसन्मुदा ॥
धर्मोन्नतिर्हि यत्र स्या–त्तिष्ठेयुस्तत्र संयताः ॥ ८९ ॥ श्रीमोहनोपदे-
शेन मुम्बायां सुरतेऽपि च ॥ तस्थुषां नविनां चित्तं धर्मरक्तमनूनृशम्
॥ ९० ॥ अथ पर्युषणे पर्व–ण्यागतेऽनव्यङ्कुर्लने ॥ श्राद्धानां धर्मबु-
द्धिस्तु जागरूकान्नवनृशम् ॥ ९१ ॥ इतः सूर्यपुरासन्ने ग्रामे कान्ता-
रनामनि ॥ जिनचैत्यं च शाला च जीर्णान्नूत्कालयोगतः ॥ ९२ ॥
प्राग्जीर्णतरशालायाः समुद्धारो विधीयताम् ॥ एवं निरणयत्सङ्घः श्री-
मोहननियोगतः ॥ ९३ ॥ पर्षद्यनयचन्द्राख्यः श्रेष्ठी तु प्रथमेऽहनि ॥
सङ्घं व्यजिज्ञपद्वित्तं यथाशक्ति प्रदीयताम् ॥ ९४ ॥ सहस्रपञ्चकं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रादा–द्विष्णुचन्द्रोऽग्रतस्ततः ॥ वितेरुरन्ये भावेन वित्तं धर्मपरा-
यणाः ॥ ९५ ॥ देवधर्मगुरूणां च प्रसादात्तत्क्षणेऽभवन् ॥ पादलक्ष-
 मिता मुद्रा–स्तदास्मिन्धर्मकर्मणि ॥ ९६ ॥ चतुर्मास्यां व्यतीतायां
धर्मचन्द्रो व्यजिज्ञपत् ॥ सार्धमागमनेनायं संघोऽलंक्रियतामिति
॥ ९७ ॥ तीर्थयात्रा भवेन्नाऽह–वान्छापि सफलेति ते ॥ विचिन्त्य
वचनं तस्य धर्मवृद्ध्यै प्रपेदिरे ॥ ९८ ॥ अथ श्रीमोहनमुनि–नाम्ना
संयतवेषभाक् ॥ गुमाननामाजगाम मोहनाङ्घ्रिसरोरुहम् ॥ ९९ ॥
ततो हेमसुमत्योश्च गुमानाख्यमुनेस्तथा ॥ छेदोपस्थापनं चक्रे सु-
लग्ने मोहनर्षिभिः ॥ १०० ॥ पौषेऽसिते च पञ्चम्यां सार्धं शिष्यैरथा- 
ष्टभिः ॥ संघं विभूषयन्तस्ते विजहुर्मोहनर्षयः ॥ १०१ ॥ भृगुकच्छे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तम्भनके तथान्येषु पुरादिषु ॥ निवसन्नध्वनि सुखं संघः स्वागत-
मासदत् ॥ १०२ ॥ नरा नार्यश्च शिशवः सर्वे सुखमवाप्नुवन् ॥
पदातयो ययुः पञ्च-शतं भव्या मुनीश्वरैः ॥ १०३ ॥ संघवात्सल्य-
मभव-त्स्थाने स्थाने मनोहरम् ॥ धर्मोऽपि वित्तमवप-च्चैत्यादौ
धर्मतत्परः ॥१०४॥ संघान्तर्वर्तिनः श्राद्धा धनाढ्याः प्रत्यहं व्यधुः ॥
भावतः संघवात्सल्यं संघः पूज्यो हि सर्वदा ॥ १०५ ॥ माघासित-
त्रयोदश्यां संघेशः संघसंयुतः ॥ सद्गुरूणां प्रसादेन पादलिप्तं समा-
सदत् ॥ १०६ ॥ तत्रत्यो नृपतिः संघ-स्वागतार्थं पदातिकान् ॥ अ-
श्ववारान् गजादींश्च प्रेषयामास संमुखम् ॥ १०७ ॥ रथयात्रादि
सकलं विधाय विधिनाथ सः ॥ धर्मचन्द्रो मोहनाङ्घ्री निपीड्य नि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





रगात्ततः ॥ १०८ ॥ श्रेष्ठी धनपतिर्नाम तदाञ्जनशलाकिकाम् ॥ वि-
धातुं मोहनमुनि-प्रतीक्षां पुरतोऽकरोत् ॥ १०९ ॥ श्रीमोहनमुनी-
न्द्रास्त-स्कार्यं निर्विघ्नमाचरन् ॥ ईदृशी विमला कीर्ति-र्विना पुण्यैर्न
लभ्यते ॥ ११० ॥ परिवारयुतास्तत्र सुखं श्रीमोहनर्षयः ॥ न्यवात्सुः
सिद्धशैलस्थ-जिनेशार्चनतत्पराः ॥ १११ ॥ ततः समन्ततः स्तोकं
विहृत्य पुनरागताः ॥ सार्धं शिष्यैश्चतुर्मासीं न्यवसंस्तत्र संयताः
॥ ११२ ॥ आषाढे च सिते षष्ठ्यां भव्यमेकमदीक्षयन् ॥ श्रीमो-
हनमुनीन्द्राः स ऋद्धिनाम्ना प्रथामगात् ॥ ११३ ॥ श्रीमोहनमुनी-
न्द्राणां सांनिध्याद्भविका घनाः ॥ सिद्धाद्रिनिकटे वस्तुं चतुर्मासीं
समागमन् ॥ ११४ ॥ वार्षिके पर्वणि तपो-ऽकारि यद्भविकैर्नरैः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेनाभूद्वीरभगव-च्छासनोन्नतिरद्भुता ॥ ११५ ॥ ततःसमवसृत्यादि-
संनिवेशं सुशिल्पिभिः ॥ कारयित्वाथ संघेन चक्रे तत्रोत्सवो महान्
॥ ११६ ॥मार्गे सिते च षष्ठ्यां च भव्यमेकं मुनीश्वराः ॥ अदीक्षय-
न्स छगण-नाम्नाभूत्प्रथितो भुवि ॥ ११७ ॥ नन्दोदध्यङ्क[१९४९]धरणी-मि-
तेऽब्दे वैक्रमेऽवसन् ॥ ऊनविंशां चतुर्मासीं पादलिप्ते मुनीश्वराः
॥ ११८ ॥ अथ सूर्यपुरस्थानां श्राद्धानामुपरोधतः ॥ श्रीमोहनर्षयः
प्रापुः सशिष्याः सुरतं पुनः ॥ ११९ ॥ यथापूर्वं चतुर्मास्यां तपस्या-
द्यभवद्बहु ॥ प्रावर्तताथ कान्तार-ग्रामे तत्रोत्सवो महान् ॥ १२० ॥
शालायां नूतनायां च संनिवेशः शुभोऽभवत् ॥ समेतशिखरादीनां
प्रान्ते स्नात्रं तथा महत् ॥ १२१ ॥ आष्टाह्निकोत्सवे तत्र समन्ताद्धा-

For Private and Personal Use Only

 

सिनो नराः ॥ आसन्नलक्षा आजग्मु–स्तेन संघोऽतुषद्भृशम्॥१७२॥
तदा तिलकचन्द्रादि–श्रेष्ठिनो धर्मतत्पराः ॥ चैत्योध्दारार्थमदद्भः स-
हस्राणि च विंशतिम् ॥ १७३ ॥ श्रीमोहनमुनीन्द्राणां सुकृतोदय-
तोऽखिलम् ॥ निरन्तरायमभव–त्पूजास्नात्रादि शोभनम् ॥ १७४ ॥
एवं विंशचतुर्मास्यां कृत्वा धर्मोन्नतिं पराम् ॥ विहर्तुमैच्छन्मुनयः परि-
वारेण संयुताः ॥ १७५ ॥ अथ मोहमयीवासि–श्राध्दा एवं व्यजिज्ञ-
पन् ॥ निजैः पदैः पुनर्मुम्बा पावनीया प्रसादतः ॥ १७६ ॥ रागिणः
श्रावका–न्देशकालाद्यालोच्य संयताः ॥ उररीकृत्य विज्ञप्तिं विजह्रु-
श्वगात्रसंयुताः ॥१७७॥ श्रावकैः सेव्यमानास्ते मुम्बापरिसरं क्रमात् ॥
आजग्मुरष्टभिः शिष्यै रागिणां मोदवर्धनाः ॥ १७८ ॥ श्रीमोहनमु-

नीन्द्राणां प्रवेशस्योत्सवो महान् ॥ सप्तम्यां भविता प्रात-र्वार्तेयं
पप्रथेऽग्रतः ॥ १२९ ॥ परिष्कृताः पुष्परथाः प्रभाते सपरिच्छदाः ॥
सनाथा भूषितैर्बालैः शतशस्तूर्णमागमन् ॥ १३० ॥ चतुर्विधानां
वाद्यानां वादने कुशला गणाः ॥ पञ्चाशत्प्रमिताः शीघ्रं हूणानां स-
मुपस्थिताः ॥ १३१ ॥ कान्तैर्वसनभूषाद्यै-र्द्योतयन्तो दिशो दश ॥
सहस्रशो नरा नार्यः स्वागताय समागमन् ॥ १३२ ॥ ततः संघं प्री-
णयन्तः श्रीमोहनमुनीश्वराः ॥ परिवारेण महता मुम्बायां प्राविश-
न्मुदा ॥ १३३ ॥ नारीणां च नराणां च द्विधा लक्षेण सरुष्टहम् ॥ प्र-
वेशस्योत्सवस्तेषां ददृशे संयतात्मनाम् ॥ १३४ ॥ वसतौ नूतनायां
ते निवसन्तश्च सांप्रतम् ॥ देशनासुधया संघं प्रीणयन्ति मुनीश्वराः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ १३५ ॥ पुष्टेक्षुरसमाधुर्य—मग्रेभ्योऽधिकमङ्घ्रिषु ॥ सुकृतं मोहन-
र्षीणां पुनर्विद्याद्यथोत्तरम् ॥ १३६ ॥ अतः पूर्वाधिकैतस्यां चतु-
र्मास्यां भविष्यति ॥ धर्मोत्साहजननी प्रवरा शासनोन्नतिः॥१३७॥
श्रीमोहनमुनीन्द्राणा—मलंचन्द्रादयो दश ॥ शिष्याः पञ्च प्रशि-
ष्याश्च वर्तन्ते सांप्रतं किल ॥ १३८ ॥ स्वाध्यायनिरतौ तत्र यशःका-
न्ती समाहितौ ॥ योगानुदूहतुः सौत्रान्यशोहर्षौ यथागमम् ॥१३९॥
तपस्वी सुमतिश्चान्ये स्वाध्यायादिषु तत्पराः ॥ चिरं जीवन्तु कुर्वन्तु
धर्मोन्नतिमिमे पराम् ॥ १४० ॥ सुदुर्लभाः सांप्रतं य-द्धर्मोन्नति-
करा जनाः ॥ चिरं तत्सपरीवारा जीयासुर्मोहनर्षयः ॥ १३९ ॥ वि-
द्वत्साविशारदा येषां मूर्ध्नि पुण्याङ्कुरा इव ॥ उल्लसन्ति शिरोजास्ते जी-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यासुर्मोहनर्षयः ॥ १४० ॥ पक्षपातेन रहिता येषां रुच्या वचःसुधा ॥ वशीकरोति भव्यांस्ते जीयासुर्मोहनर्षयः ॥ १४१ ॥ इति मुनिवरमोहनप्रकृष्ट-गुणगणरुचिराम्बुजासनायाः ॥ वचनकुसुममालिका सुकण्ठे- ऽनवरतमिह राजतां शिवाय ॥ १४२ ॥ इति श्रीमत्पदवाक्य-प्रमाणपारावारीण-विद्वन्मुकुटालंकार-श्रीबालकृष्णभगवच्चरणारविन्दमिलिन्दायमानान्तेवासिनः कानडोपाह्व-गोविन्दात्मज-दामोदरस्य कृतौ शाङ्के श्रीमोहनचरिते षोडशादि-विंशावधि-चातुर्मास्यवर्णनं नामाष्टमः सर्गः ॥ ८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir







॥ श्रीरस्तु ॥

गोविन्दाचार्यपुत्रेण श्रीकृष्णाकुक्षिजन्मना ॥
मनोज्ञकृष्णाकूलस्थ—वैराजक्षेत्रवासिना ॥ १ ॥
प्राणायि कानडोपाह्वश्रीदामोदरशर्मणा ॥
श्रीमोहनर्षिचरितं श्रेयसे भव्यजन्मिनाम् ॥ २ ॥ युग्मम् ॥
देवकर्णादयः श्रेष्ठि—वर्या अस्याङ्कने ददुः ॥
साहाय्यमुचितं तेन नन्दन्तु भुवि ते चिरम् ॥ ३ ॥

आ. कै. ज्ञ
कोबा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इदं पुस्तकं ग्रन्थोत्तेकपर्षदा जावजीदादाजीत्येषां निर्णयसागरयन्त्रालये मुद्रितम् । तच्च सप्तषष्ट्युत्तराष्टादशशतस्य पञ्चविंशंनियममनुसृत्य राजसदसि निवेदितम् ॥ संवत् १९५२ कार्तिकशुक्लत्रयोदस्यां गुरौ संपूर्णमिदम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति मोहनचरितेऽष्टमः सर्गः ॥

For Private and Personal Use Only